672

672

सिद्धान्तमुक्तावलिः

Siddhanta Muktāvali	Title
Siddhanta Pañchānan	Author
Bhattāchārya	Editor
Saka 1675	Year, Vols.
	Publisher
672	Remarks

न॰ मुक्तावली॰ श्रीगणेशायनमः॥ चूडामणीकृतविधुर्वलयीकृतवासुकिः॥ भवोभवतुभव्यायलीलाताण्डवपण्डितः॥१॥
निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरंतनोक्तिभिः॥ विशदीकरवाणिकौतुकान्ननुराजीवदयावशंवदः॥२॥
सद्रव्यागुणगुंफितासुकृतिनांसत्कर्मणांज्ञापिकासत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्वला॥ विष्णो
॥१॥ र्वक्षसिविश्वनाथकृतिनासिद्धांतमुक्तावलीविन्यस्तामनसोमुदंवितनुतासद्युक्तिरेषाचिरं॥३॥ विघ्नविघा
तायकृतंमंगलंशिष्यशिक्षायैनिबध्नाति॥ ननुमंगलंनविघ्नध्वंसंप्रतिनवासमाप्तिंप्रतिकारणं॥ विनापिमंग
लंनास्तिकादीनांग्रंथेनिर्विघ्नपरिसमाप्तिदर्शनादितिचेन्न॥ अविगीतशिष्टाचारविषयत्वेनमंगलस्यसफलत्वेसि
द्धेतत्रफलजिज्ञासायांसंभवतिदृष्टफलकत्वे [illegible] अदृष्टफलकल्पनायाःअन्याय्यत्वात्॥ उपस्थितत्वात्समाप्तिरेव श्रीशिव
३ फलंकल्प्यते॥ इत्थंचयत्रमंगलंनदृश्यतेतत्रापिजन्मांतरीयंकल्प्यते॥ यत्रचसत्यपिमंगलेसमाप्तिर्नदृश्यतेतत्रब
लवत्तरोविघ्नोविघ्नप्राचुर्यंवाबोध्यं॥ प्रचुरस्यैवास्यबलवत्तरविघ्ननिवारणेकारणत्वंबोध्यं॥ विघ्नध्वंसस्तुमंग ॥१॥
लस्यद्वारमित्याहुःप्राञ्चः॥ नव्यास्तु॥ मंगलस्यविघ्नध्वंसएवफलं॥ समाप्तिस्तुबुद्धिप्रतिभादिकारणकलापा
त्॥ नचस्वतःसिद्धविघ्नविरहवताकृतस्यमंगलस्यनिष्फलत्वापत्तिरितिवाच्यं॥ इष्टापत्तेः॥ विघ्नशंकयातदाचरणा

स्य १ त्॥ तथैवशिष्टाचारात्॥ नचतत्रनिष्फलत्वेतद्बोधकवेदाप्रामाण्यं॥ विघ्नेतन्नाशस्यैववेदबोधितत्वात्॥ अतएवपापभ्रमे
तद्बोधक २ णकृतप्रायश्चित्तस्यनिष्फलत्वेपिनवेदाप्रामाण्यं॥ मंगलंचविघ्नध्वंसविशेषेकारणं॥ विघ्नध्वंसविशेषेच
विनायकस्तवपाठादिः॥ क्वचिदविघ्नात्यंताभावएवसमाप्तिंप्रतिकारणं॥ प्रतिबंधकसंसर्गाभाव [illegible] स्यैव
यज्जनक का [illegible] त्वात्॥ इत्थंचनास्तिकादिकृतग्रंथेषुजन्मांतरीयमंगलजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यंताभावोवास्तीति
नव्यभिचारइत्याहुः॥ संसारेति॥ संसारएवमहीरुहोवृक्षस्तस्यबीजाय॥ निमित्तकारणायेत्यर्थः॥ एतेनईश्वरेप्रमाणद सद्भावे
घटवत् र्शितंभवति॥ तथाहि॥ क्षितिःसकर्तृकाकार्यत्वात् यथाघटादिकार्यंकर्तृजन्यंतथाक्षित्यंकुरादिकमपि॥ नच त्रै५
न२ तत्कर्तृत्वमस्मदादीनांसंभवतीत्यतस्तत्कर्तृत्वेनईश्वरसिद्धिः॥ नचशरीराजन्यत्वेनकर्तृजन्यत्वसाधकेनसत्प्र
तिपक्षइतिवाच्यं॥ अप्रयोजकत्वात्॥ ममतुकर्तृत्वेनकार्यत्वेनकार्यकारणभावएवअनुकूलस्तर्कः॥ द्यावाभूमीजन
यन्देवएकः॥ विश्वस्यगोप्ताभुवनस्यकर्तेत्याद्यागमाप्यनुसंधेयाः॥ द्रव्यगुणइत्यादि॥ सप्तमस्याभावत्वकथना
देवषण्णांभावत्वप्राप्तं॥ तेनभावत्वेनपृथगुपन्यासोनकृतः॥ एतेचपदार्थावैशेषिकशास्त्रेप्रसिद्धाः॥ न्यायनैयिकाना
मप्यविरुद्धाः॥ प्रतिपादितंचैवमेवभाष्ये॥ अतएवउपमानमपिसप्तपदार्थभिन्नतयासादृश्यस्यातिरिक्तपदार्थत्व
चिंता मं द्रव्यंगुणास्तथाकर्मसामान्यंसविशेषकं॥ समवायस्तथाभावःपदार्थाःसप्तकीर्तिताः॥२॥

स्तेणान्च

मुक्तावली मोशंकितं। ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वात्। तथाहि। मण्यादिसमवहितेन वह्निना दाहो
न जन्यते। तच्छून्येन तु जन्यत एव। तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते। उत्तेजकेन मण्याद्यपसारणेन वा ज
न्यत इति कल्प्यते। एवं सादृश्यमपि अतिरिक्तः पदार्थः। तद्धि न षड्भावेष्वन्तर्भवति। सामान्येऽपि सत्त्वात्। यथा गोत्वं नित्यं त
३ था अश्वत्वमपीति सादृश्यप्रतीतेः॥ नाप्यभावे। सत्त्वेन प्रतीयमानत्वादिति चेन्न। मण्याद्यभावविशिष्टवह्नेर्द
दाहादिकं प्रति मण्यभावादेरेव वा स्वातंत्र्येण हेतुत्वं कल्प्यते॥ अनेनैव सामंजस्ये अनंतशक्तितत्प्रागभावध्वंसक
ल्पनानौचित्यात्॥ न चोत्तेजके सति प्रतिबंधकसद्भावे कथं दाह इति वाच्यम्॥ उत्तेजकाभावविशिष्टमण्याद्यभाव
तं९ स्य कारणत्वात्॥ एवं सादृश्यमपि न पदार्थांतरं॥ किंतु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यं॥ यथा चंद्रभि श्री शिव
द॰ न्नत्वे सति चंद्रगताह्लादादिमत्त्वं मुखे चंद्रसादृश्यमिति। द्रव्याणि विभजते॥ क्षित्यप्तेजो इति। क्षितिः पृथिवी॥ आपः उ
दकं। मरुद्वायुः॥ व्योम आकाशः। देही आत्मा। एतानि नवद्रव्याणि। स्पर्थः। ननु द्रव्यत्वजातौ न हि तत्र प्रत्यक्ष[illegible]प्रमाणं॥ २
तु२ घटत्वकुंभत्वादिषु द्रव्यत्वाग्रहादिति चेन्न। कार्यसमवायीकारणतावच्छेदकतया संयोगस्य विभागस्य समवायीकारणता च
वच्छेदकतया वा द्रव्यत्वजातिसिद्धेरिति। ननु तमो द्रव्यं तमः कुतो नोक्तं। तद्धि प्रत्यक्षेण गृह्यते। तस्य रूपवत्त्वात् कर्मवत्त्वा
नोर क्षित्यप्तेजो मरुद्व्योमकालदिग्देहिनो मनः॥ १
कि मानि॥ २

स

द्रव्यां अद्रव्यत्वं॥ तच्च गंधशून्यत्वान्न पृथिवी॥ नीलरूपवत्त्वान्न जलादिकं॥ न त्वप्रत्यक्षे च आलोकनिरपेक्षं चक्षुः कारणमिति
चेन्न॥ आवश्यकतेजोऽभावेनैवोपपत्तौ द्रव्यांतरकल्पनस्यान्याय्यत्वात्॥ रूपवत्ताप्रतीतिर्भ्रमरूपा॥ कर्मप्रतीतिरपि आ
लोकापसारणोपाधिकी भ्रांतैव॥ तमसोऽतिरिक्तत्वे अनंतावयवादिकल्पनागौरवं च स्यात्। सुवर्णस्य यथा तैजसत्वं भाव
स्तथाग्रे वक्ष्यते॥ गुणान्विभजते। द्रव्याणि। अथ गुणा रूपरसगंधस्ततः परं॥ ३॥ स्पर्शः संख्या परिमितिः पृथक्त्वं च
ततः परं। संयोगश्च विभागश्च परत्वं चापरत्वकं॥ ४॥ बुद्धिः सुखदुःखमिच्छा द्वेषो यत्नो गुरुत्वकं॥ द्रवत्वं स्नेहसंस्कारावदृ
ष्टं शब्द एव च॥ ५॥ एते गुणाः चतुर्विंशतिसंख्याकाः कणादेन कंठतश्चशब्देन च दर्शिताः॥ तत्र गुणत्वादिजातिसिद्धिरग्रे
वक्ष्यते॥ कर्माणि विभजते॥ उत्क्षेपणं ततो अपक्षेपणं आकुंचनं तथा॥ प्रसारणं च गमनं कर्माण्येतानि पंच च॥ ६॥
कर्मत्वादि जातिस्तु प्रत्यक्षसिद्धा। उत्क्षेपणत्वादिकमपि। ननु भ्रमणादिकमपि पृथक् कर्म। अधिकत्वात् कुतो नोक्तं।
न्ये३ अत आह। भ्रमणं रेचनं स्यंदनोर्ध्वज्वलनमेव च॥ तिर्यग्गमनमप्यत्र गमनादेव लभ्यते॥ ७॥ सामान्यं निरूपयति॥
सामान्यं द्विविधं प्रोक्तं परं चापरमेव च॥ तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वं॥ अनेकसमवेतत्वं संयोगादीनाम
प्यस्ति। अत उक्तं नित्यत्वे सतीति। नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्ति अत उक्तं अनेकेति। नि

१ आकाशत्वं घटत्वं कलशत्वं भूतत्वं मूर्त्तत्वं परस्परासंताभावसमानाधिकरणयोरेकत्र समावेशः सांकर्यं सामान्ये सामान्यं विशेषे विशेषत्वं समवाये समवायत्वं॥ २

सि॰मुक्ता॰वली॰ त्वसत्ति अनेकवृत्तित्वं असंताभावस्याप्यस्ति। अनेकवृत्तिसामान्यं विहाय समवेतस्कं तं। एकमात्रवृत्ति ... जातिः। तथाचोक्तं। व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः। रूपहानिरसंबंधो जातिबाधकसंग्रहः॥ द्रव्यादित्रि॰ परत्वं अधिकदेशवृत्तित्वं अपरत्वं अल्पदेशवृत्तित्वं॥ सकलजात्यपेक्षया अधिकदेशवृत्तित्वात् सत्तायाः परत्वं॥ तदपेक्षया चान्यासां जातीनामपरत्वं॥ विशेषान्निरूपयति। अंत्य इति॥ अंते ×अवसाने वर्त्तंत इति अंत्याः॥ यदपेक्षयान्यो विशेषो नास्तीत्यर्थः॥ घटादीनां द्व्यणुकपर्यंतानां तत्तदवयवभेदात्परस्परंभेदः। परमाणूनां परस्परं भेदको विशेष एव॥ स तु स्वत एव व्यावृत्तः। तेन तत्र विशेषांतरापेक्षा नास्तीति भावः॥ समवायं दर्शयति॥ घटादीनामिति। अवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्च यः संबंधः स समवायः। समवायत्वं नित्यसंबंधत्वं। तत्र प्रमाणं तु। गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसंबंधविषया। विशिष्टबुद्धित्वात्। दंडी पुरुष इति विशिष्टबुद्धिवत् इत्यनुमानेन संयोगादिबाधात्समवायसिद्धिः। न च स्वरूपसंबंधेन सिद्धसाधनं अर्थांतरं वा। अनंतस्वरूपाणां संबंधत्वकल्पने गौरवात्॥ लाघवात् एकसमवायसिद्धिः। न च समवायस्यैकत्वे रूपवत्ता(बुद्धि)प्रसंगः। तत्र रूपसमवायसत्त्वेपि रूपाभावात्॥ न चैवं अभावस्यापि वैशिष्ट्यं संबंधांतरं सिध्येदिति वा×वायौ×च्यं। तस्य नित्यत्वे भूतले घटानयनानंतरम

घटादीनां कपालादिषु द्रव्येषु गुणकर्मणोः तेषु जातेश्च यः संबंधः समवायः प्रकीर्तितः॥

× संसर्गाभावान्योन्याभावभेदादित्यर्थः ४

अभावस्त्वद्विधा संसर्गान्योन्याभावभेदतः १

पि घटाभावबुद्धिप्रसंगात्। घटाभावस्य तत्र सत्त्वात्। तस्य नित्यत्वात्। अन्यथा देशांतरेपि घटाभावप्रतीतिर्न स्यात्॥ वैशिष्ट्यस्य तत्र सत्त्वात्॥ मन्मते तु घटे पाकरक्तदशायां श्यामरूपस्य नष्टत्वान्न तद्बुद्धिः। वैशिष्ट्यस्य नित्यत्वे च तत्तद्वैशिष्ट्यकल्पने तवैव गौरवं॥ इत्थं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां संबंधः॥ अभावं विभजते। अभावस्त्विति॥ अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वं॥ संसर्गेति॥ अन्योन्याभावस्यैकविधत्वान्न विभागः। अतः संसर्गाभावं विभजते॥ प्रागभाव इति॥ संसर्गाभावत्वं चान्योन्याभावभिन्नाभावत्वं॥ अन्योन्याभावत्वं तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं॥ विनाश्यभावत्वं प्रागभावत्वं॥ जन्याभावत्वं ध्वंसत्वं॥ नित्यसंसर्गाभावत्वं अत्यंताभावत्वं॥ यत्र तु भूतलादौ घटादिकं अपसारितं पुनरानीतं च तत्र घटकालस्य संबंधविघटकत्वादत्यंताभावस्य नित्यत्वेपि घटकाले न घटात्यंताभावबुद्धिः॥ तत्रोत्पत्तिविनाशशाली चतुर्थोयमभाव इति केचित्॥ अत्र ध्वंसप्रागभावाधिकरणे नात्यंताभावः॥ नव्यास्तु॥ तत्र विरोधे मानाभावात्॥ ध्वंसादिकालावच्छेदेनाप्यत्यंताभावो वर्त्तत इत्याहुः॥ नन्वभावानां अधिकरणात्मकत्वं लाघवादिति चेन्न। अनंताधिकरणात्मकत्वकल्पनापेक्षया अतिरिक्तकल्पनाया एव लघीयस्त्वात्॥ एवं चाधाराधेयभावोप्युपपद्यते। एवं तत्तच्छब्दरसगंधाभावानां प्रत्यक्षत्वमनुपपद्यते॥ अन्यथा तत्तदधिकरणानां तत्तदिंद्रियाग्राह्यत्वात् प्रत्यक्षं न स्यात्॥ एतेन ज्ञानविशेषाद्यात्मकत्वमत्यं

...रिनिप्रायायत॥ श्यामघटे रक्तो घटो नास्ति रक्तघटश्यामो नास्तीति धीश्च प्रागभावध्वंसचावगाहिते। न तु तदत्यंताभावं॥ नव्यास्तु ४

१ प्रागभावस्तथा ध्वंसोप्यत्यंताभाव एव च। एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते। ७

४ द्रव्यस्य पंचभावा अनेके समवायिन इति वे॰ २

सत्तावंतस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः १

सत्तानामपि साधर्म्यं तेयत्वादिकमुच्यते १

सिद्धा॰मु॰ पत्री॰ ताभावस्येत्यपि प्रत्यक्षं ॥ अप्रत्यक्षत्वापत्तेः ॥ इदानीं पदार्थानां साधर्म्यवैधर्म्ये वक्तुमुपक्रमते। सत्तानामित्यादि। समानो

धर्मो येषां ते सधर्माणः तेषां भावः साधर्म्यं समानो धर्म इति फलितोर्थः ॥ विरुद्धो धर्मो येषां ते विधर्माणस्तेषां भावो वैधर्म्यं विरु

४ द्धो धर्म इति फलितोर्थः। ज्ञेयत्वं ज्ञानविषयता सा च सर्वत्रैवास्ति ॥ ईश्वरज्ञानविषयतायाः केवलान्वयित्वात्। एवं अभि

धेयत्वादिकं बोध्यं ॥ द्रव्येति। द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यं अनेकत्वं समवायित्वं च। यद्यप्यनेकत्वं न भाव

प्यास्ति तथापि अनेकत्वं सत्तानावत्त्वं। तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं तदर्थः। तेन प्रत्येकं घटेनाव्या

नसंबंधित्वं॥ प्तिः समवायित्वं समवायसंबंधेनैत्वं। न तु समवायत्वं। सामान्यादावभावात्। सत्तावंत इति। द्रव्यगुणकर्मणां सत्तावत्त्वमि

पि॰ त्यर्थः। गुणादिरिति। यद्यपि गुणक्रियाशून्यत्वमा × द्य × क्षणे घटादावतिव्याप्तं। क्रियाशून्यत्वं च गगनादावतिव्याप्तं।

तथापि गुणवद्वृत्तिधर्मवत्त्वं कर्मवद्वृत्तिपदार्थविभाजकोपाधिमत्त्वं तदर्थः। न हि घटत्वादिकं द्रव्यत्वं वा गुण श्रीशिव

कर्मवदर्शनि॰ वद्वृत्ति वा ॥ किंतु गुणत्वादिकं तथा। आकाशत्वं तु न पदार्थविभाजकोपाधिः। सामान्येति। सामानाधिकरण्यं या॰ ४

त्वसामान्याद्भिन्नमित्यर्थः। पारिमाण्डल्येति। पारिमाण्डल्यं परमाणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः ॥ अ

णुपरिमाणं तु न कस्यापि कारणं। तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारंभकं भवेत् ॥ तच्च न संभवतीति। परिमाणस्य

२ पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतं ॥ २

सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः ॥ २

१ अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता। कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितं १

चि द्रूपघटासमवायीकारणत्वं स्यात्। एवं ज्ञानादिकमिच्छाद्यसमवायीकारणं स्यात्। एवं वेगादीनामभिघाताद्यसमवायीकारणत्वं ६×

स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् ॥ महद्दीर्घस्य महत्तरत्ववत्। अणुजन्यस्याणुतरत्वप्रसंगात्। एवं परममहत्परि

माणं अतींद्रियसामान्यविशेषाश्च बोध्याः ॥ इदानीमपि योगिप्रत्यक्षे विषयस्य न कारणत्वं ॥ ज्ञायमानं सामान्यं न प्रत्यासत्तिः ॥

ज्ञायमानं लिंगं नानुमितिकरणमित्यभिप्रायेण ॥ मानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात् परममहत्परिमाणं आकाशादेर्बो

२४ ध्यं। तस्यापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये। तन्न। ज्ञानगोचरे तं प्रति अकारणतायाः एवं आचार्यैरुक्तत्वात् ॥ ननु

~ कारणत्वं किंतत् आह। अन्यथेति। तस्य कारणत्वस्य। तत्र समवायीकारणे आसन्नं प्रत्यासन्नं। कारणं द्वितीयमसमवा

यीकारणमित्यर्थः। अत्र यद्यपि तुरीतंतुसंयोगस्य स्यात्। तथापि पटासमवायीत्वलक्षणे तुरीतंतुसंयोगभिन्नत्वं देयं। तुरी

तंतुसंयोगस्य तु तुरीपटसंयोगं प्रत्यसमवायीकारणं भवत्येव। एवं वेगादिकं × कारण × वेगस्पंदाद्यसमवायीकारणं भवत्ये

सं वेति ॥ तत्कार्यासमवायीकारणलक्षणे तद्भिन्नत्वं देयं। आत्मविशेषगुणानां तु कुत्राप्यसमवायीकारणत्वं नास्ति। तेनान

द्भिन्नत्वं सामान्यलक्षणे देयमेव। अत्रासमवायीकारणे प्रत्यासन्नं द्विविधं ॥ कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्या

सत्त्या च। आद्यं यथा। घटादिकं प्रति कपालसंयोगादिकं। तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्यैकस्मिन् क

पालप्रत्यासत्तिरस्ति। द्वितीयं यथा ॥ घटरूपं प्रति कपालरूपं समवायीकारणं। तत्र घटरूपं प्रति कारणं घटस्तेन सह क

१ समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वं ॥ एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वं ॥ यत्समवेतं कार्यं भवति ज्ञेयं तु तत्समवायिजनकं। तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥ ६

येनसहपूर्वभावः कारणमादायवायस्य ४ अन्यंप्रतिपूर्वभावेज्ञातेयत्पूर्वभावविज्ञानं ५

सि॰त॰का॰ डी॰ पालेरूपस्यएकस्मिन्कपालेप्रत्यासत्तिरस्ति। तथा च क्वचित्समवायसंबंधेन क्वचित्समवायिसमवायसंबंधेनेतिफ
लितोर्थः॥ इत्थं च कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या कारणं ज्ञानादिभिन्नमसमवायिकारणमितिसामान्यल
समवायी कारणो क्षणं पर्यवसन्नं। आभ्यां समवाय्यसमवायिकारणाभ्यां परं भिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः॥ इदानीमन्यथासिद्धत्वमे नी
वकियत्तानदाह॥ येनेत्यादिना। यत्प्रतिपूर्ववृत्तित्वं येन रूपेण गृह्यते तेन तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः। यथाघ या ४
५ उ॰ टंप्रतिदंडत्वमिति। द्वितीयमन्यथासिद्धमाह। कारणमिति। यस्यस्वातंत्र्येण अन्वयव्यतिरेकौ न स्तः किंतु कारणमादा
यैवान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धं यथा दंडरूपं। तृतीयमाह। अन्यंप्रतीति। अन्यंप्रतिपूर्ववृत्तित्वं गृहीत्वे
वयस्य यत्कार्यंप्रतिपूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यंप्रति अन्यथासिद्धं॥ यथा घटादिकंप्रत्याकाशस्य। आकाशस्य हि भा
तु ४ घटादिकंप्रतिकारणत्वं आकाशत्वेन स्यात्॥१॥ आकाशत्वं शब्दसमवायिकारणत्वं॥ अतश्च शब्दंप्रतिजनक श्रीशिव॰
त्वं गृहीत्वैव घटादिकंप्रतिजनकत्वं ग्राह्यं। अतस्तदन्यथासिद्धं। शब्दाश्रयत्वेन तस्य कारणत्वे का अन्यथासिद्धि ५
रितिचेत्तन्न। पंचमीति। अथाकाशस्य शब्दंप्रतिजनकत्वे किमवच्छेदकमितिचेत्। कत्वादिकं विशेषपदार्थो वे
+ ति। चतुर्थमन्यथासिद्धमाह। जनकंप्रतीति। यत्कार्यजनकंप्रतिपूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यंप्रतिपूर्वव
जनकंप्रतिपूर्ववृत्तितामपरिज्ञायनयस्यगृह्यते॥२॥

अतिरिक्तमथापिनियतावश्यकपूर्वभाविनः॥ एतेपंचान्यथासिद्धा दंडत्वादिकमादिमं। घटादौ दंडरूपादि द्वितीयमपि दर्शितं॥ तृतीयंतु भवेद्व्योम कुलालजनकोऽपरः। पंचमो रासभादिःस्यादेतेष्वावश्यकस्त्वसौ

त्वं॰ त्तित्वं गृह्यते तस्य तत्कार्यंप्रति अन्यथासिद्धं॥ यथा कुलालपिता घटंप्रति। तस्य कुलालपितृत्वेन घटंप्रतिजनक
त्वे अन्यथासिद्धिः। कुलालत्वरूपेण जनकत्वे त्विष्टापत्तिः। कुलालस्य घटंप्रतिजनकत्वात्। पंचममन्यथासिद्धमा त्व २
ह। अतिरिक्तमिति। एतीति। घटादाविति। तृतीयमिति। अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्य
थासिद्धमित्यर्थः। अतएव प्रत्यक्षे महत्त्वं कारणं। अनेकद्रव्यत्वमन्यथासिद्धं। तत्र हि महत्त्वमवश्यक्लृप्तं। तेनानेकद्रव्य
त्व ५ त्वमन्यथासिद्धं। नचैवं परित्वे किं विनिगमकमितिवाच्यं। महत्त्वजातेः कारणतावच्छेदकत्वे लाघवात्। पंचमो रा
घपित ६ १ सभादिः स्यात्। यत्र घटव्यक्तिंप्रति रासभस्य नियतपूर्ववर्तित्वमस्ति। तत्रापि घटजातीयंप्रति सिद्धकारणभावैर्द
ण्डादिभिरेव तद्व्यक्तेरपि संभवाद्रासभो अन्यथासिद्ध इति भावः। एतेष्वावश्यकस्त्वसौ॥ एतेषु पंचसु अन्यथासि
सिद्ध ४ द्धेषु मध्ये पंचमो अन्यथासिद्धः आवश्यकः। तेनैव परेषां चरितार्थत्वात्। तथाहि। दंडादिभिरवश्यक्लृप्तनियतपूर्ववर्तिभि
रेव कार्यसंभवे दंडत्वादिकं अन्यथासिद्धं। नचैवं परित्वे किं विनिगमकमिति वाच्यं। दंडत्वस्य कारणत्वे दंडघटितपर
परायाः संबंधत्वं गौरवात्। एवमन्येषामप्यनेन चरितार्थत्वं संभवति। समवायिकारणत्वं द्रव्यस्यैवेति। तेनैतस्पष्टं॥ त्यं २
गुणकर्ममात्रवृत्तीति। असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं। नतु गुणकर्मणोः साधर्म्यमिति ज्ञापितात्पर्यं। अथवा असमवा त्यं
यमथाप्यसमवायिहेतुत्वं

कल्पने

कालिकविशेषेण तादात्म्यवृत्तिमत्त्वं इति परमार्थः तेन समवायस्य समवायेन वृत्तित्वं ...
क्षित्यादीनां नवानां तु द्रव्यत्वगुणयोगिता २

क्षितिर्जलं तथा तेजः पवनो मन एव च। परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी ४

वृत्ति १ कारण २ वत्त्व १ अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते २

सि॰ मुक्ता॰ व॰ ४ यिकारणत्वे सति ... जातिमत्त्वमित्यर्थः। तेन ज्ञानादीनां असमवायीकारणत्वविरहेऽपि नाव्याप्तिः। अन्यत्र नित्यद्रव्येभ्य इ
ति। नित्यद्रव्याणि परमाण्वादीनि विहाय आश्रितत्वं साधर्म्यमित्यर्थः। आश्रितत्वं समवायसंयोगान्यतरसम्बन्धे
न वृत्तिमत्त्वं। विशेषणतया नित्यानामपि कालादौ वृत्तेः॥ इदानीं द्रव्यस्यैव वैशिष्ट्यं साधर्म्यं वक्तुमुपक्रमते॥ क्षित्यादीना
मिति। क्षितिरिति। परापरत्वमिति। पृथिव्यप्तेजोवायुमनसां परत्वमपरत्वं मूर्त्तत्वं कर्मवत्त्वं वेगवत्त्वं च साधर्म्यं॥
न च यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यं। परत्वसामानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य
विवक्षितत्वात्॥ मूर्त्तत्वं अपकृष्टपरिमाणवत्त्वं। तच्च एतेषामेव। गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्॥
एवं च कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं। वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं बोध्यं। का
लखात्मदिगिति। कालाकाशात्मदिशां सर्वगतत्वं सर्वमूर्त्तसंयोगित्वं परममहत्त्वं च। परममहत्त्वं जातिविशेषः॥ श्रीशिव
अपकर्षानाश्रयपरिमाणवत्त्वं वा॥ क्षित्यादि पंच भूतानि। पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं। तच्च बहिरिन्द्रियग्राह्यविशे
षगुणवत्त्वं। अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यं। तेन ज्ञानो घट इति प्रत्यक्षे ज्ञानस्याप्युपनीतभानविषय
त्वात्तद्वति आत्मनि नातिप्रसंगः। न वा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः। तस्यापि स्वरूपयोग्य

कालखात्मदिशां सर्वगतत्वं परमं महत् ४ त्वं ४

अथाकाशशरीरिणां। अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते २

त्वान्महत्त्वलक्षणकारणान्तरासन्निधानान्न प्रत्यक्षं। अथवा आत्मावृत्तिविशेषगुणवत्त्वं तत्त्वं। चत्वारि स्पर्शवन्तीति हि। पृथिव्यप्तेजो
वायूनां स्पर्शवत्त्वं। द्रव्यारम्भश्चतुर्षु स्यात्। पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वं। न च द्रव्यानारम्भके घटादावव्याप्तिः। द्रव्यसमवा
यीकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। अथाकाशमिति। अव्याप्यवृत्तीति। आकाशात्मनामव्याप्य
वृत्तिक्षणिकविशेषगुणवत्त्वं। आकाशस्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः। यत्किंचिदवच्छेदेन शब्दे उत्पन्नेऽपि तदन्या
वच्छेदेन तदभावस्यापि सत्त्वात्। क्षणिकत्वं तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं। योग्यविभुविशेषगुणानां स्वोत्तरव
र्त्तिगुणनाश्यत्वात्। प्रथमशब्दस्य द्वितीयशब्देन नाशः। एवं ज्ञानादीनामपि। ज्ञानादिकं हि आत्मनि विभोर्देहाद्यवच्छे
देन जायते तदन्यावच्छेदेन तदभावोऽस्त्येव। एवं ज्ञानादिकमपि क्षणद्वयावस्थायी। इत्थं चाव्याप्यवृत्तिविशेषगुणवत्त्वं
क्षणिकविशेषगुणवत्त्वं चार्थः। पृथिव्यादौ रूपादिविशेषगुणोऽस्ति स चाव्याप्यवृत्तिर्न। तत्रैवाव्याप्यवृत्तिः संयोगादिरस्तीति विशेष
गुणेत्युक्तं॥ न च रूपादीनामपि ध्वंसक्वचित्तृतीयक्षणे नाशसम्भवात्॥ क्षणिकविशेषगुणवत्त्वं क्षित्यादौ अतिव्याप्तमिति वा
च्यं॥ चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात्॥ अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति। क्षणचतुष्टयं तु न कि
मपि ज्ञानादिकं तिष्ठति। रूपत्वादिकं तु क्षणचतुष्टयावस्थायिन्यपि रूपादौ वर्त्तत इति न दोषः॥ ईश्वरज्ञानस्य च

त्वा

त   य   क

सि० मुक्तावली ० तुःक्षणवृत्तित्वात्॥ ज्ञानस्य तद्वृत्तित्वाज्जन्येत्युक्तं॥ यदाकाशादीनां आत्मनः साधर्म्यं। तदा जन्येति न देयं। द्वित्वादीनादाय।
लक्षणसमन्वयात्॥ परममहत्त्वतादृशगुणत्वात्॥ चतुर्थक्षणे द्वित्वादीनां नाशाभ्युपगमात् द्वित्वादीनामपि लक्ष्यत्वात्तद्वार
७ णाय विशेषणेति॥ निर्गुणवृत्तित्वं वा वाच्यं॥ इच्छादिकमादाय लक्षणसमन्वयात्॥ परममहत्त्वस्य तादृशरूपद्रवत्वप्रत्य
क्षयोगिनः प्रथमास्त्रयः। पृथिव्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वं चेत्यर्थः॥ न च चक्षुरादीनामजेन कपाल
स्थवन्हे रूपमणाच्च रूपवत्त्वे किमानमिति वाच्यं॥ तत्रापि तेजस्त्वेन रूपानुमानात्। एवं च वाय्वानीन पृथिवीजलते
रू ६ जोभागो नामपि पृथिवीत्वादिना रूपानुमानं बोध्यं। न च घटादौ दुलस्कवर्णादिभिन्ने तेजसि च द्रवत्वमव्याप्तमिति वाच्यं। स   प्रघ्रति
द्रवत्वमव्याप्यवृत्ति द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ घृतजतुषु पृथिवीषु जलेषु दुलस्कवर्णादौ तेजसि पीशिव
च द्रवत्वसत्त्वात्। तत्र पृथिवीत्वादिसत्त्वात्तदादाय सर्वत्र लक्षणसमन्वयः॥ न च प्रत्यक्षविषयत्वं परमाण्वादौ अव्या
प्तं अतिव्याप्तं च वाय्वादाविति वाच्यं॥ चाक्षुषप्रत्यक्षविषयवृत्ति द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ आत्म १
न्यतिव्याप्तिवारणाय चाक्षुषेति॥ गुरुणी द्वे रसवती॥ गुरुत्वं रसवत्त्वं च पृथिवीजलयोरित्यर्थः। न च घ्राणेन्द्रियादीनां
वाय्वानीतपार्थिवादिभागानां च रसादिमत्त्वे किं मानमिति वाच्यं॥ तत्रापि पृथिवीत्वादिना तदनुमानात्॥ द्वयोरिति॥

वेत्वं २

द्वयोर्नैमित्तिको द्रव १

स्पर्शादयोऽष्टौ वेगाख्यसंस्कारो मरुतो गुणाः॥ स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः॥ स्पर्शाद्योऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकं॥ रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश॥ स्नेहहीना गन्धयुताः क्षितावे
तेचतुर्दश। बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा॥ धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश॥ संख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे॥ परापरत्वे संख्यादिपञ्च वेगश्च मानसे॥ ३०॥ ३१॥
संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे

पृथिवीतेजसोरित्यर्थः॥ न च नैमित्तिकद्रवत्वं घटादौ वह्न्यादौ चाव्याप्तमिति वाच्यं॥ तत्रापि पृथिवीत्वादिना नैमित्तिकद्र   आत्मनोत्तमर्गाश्चानिशेषगुणायोगिनः॥२
पंचुत्वेयस्यसाधर्म्यवैधर्म्यनिलरस्पततू ३ वत्वसामानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ आत्मनो भूतवर्गाश्चेति। पृथिव्यप्तेजोवाय्वाकाशा
त्मनां विशेषगुणवत्त्वमित्यर्थः। यदुक्तमिति। ज्ञेयत्वादिकं विहायेति बोध्यं। तन्मनसोऽपि वैधर्म्यं। तस्य केवलान्वयित्वा
त्। स्पर्शाद्योऽष्टौ वेगाख्येति। स्पर्शाद्यष्टाविति। स्पर्शाद्योऽष्टाविति। रूपं रसेति। स्नेहहीनेति। बुद्ध्यादिषट्कमिति। धर्मा
धर्माविति। संख्यादिपञ्चकं कालदिशोः। संख्यादयेति। परापरत्वेति। ते च संख्यादयः पञ्च। खे आकाशे॥ साधर्म्यवैध
र्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति। तत्रेति। क्षितिर्गन्धहेतुः गन्धसमवायिकारणमित्यर्थः। यद्यपि गन्धव
त्त्वमात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तं॥ तथाहि॥ पृथिवीत्वं गन्धसमवायि   त्वं ५
त्वा कारणतावच्छेदकतया सिध्यति। अन्यथा गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः। न च पाषाणादौ गन्धाभावात् गन्धवत्त्व
मव्याप्तमिति वाच्यं॥ तत्रापि गन्धसत्त्वात्। अनुपलब्धिस्त्वनुत्कटत्वेनाप्युपपद्यते। कथमन्यथा तद्भस्मनि गन्ध उपल
भ्यते॥ भस्मनो हि पाषाणध्वंसजन्यत्वात्॥ पाषाणोपादानोपादेयत्वं सिध्यति। यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादा
नोपादेयमिति व्याप्तेः॥ दृष्टं चैतत् खण्डपटे महापटध्वंसजन्ये। एवं च पाषाणपरिमाणोः पृथिवीत्वात्तज्जन्यपाषाणस्य।

दी॥ तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता॥ दी

वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश॥ दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव १ स्पर्शादिवार्वेगंते अपंस्तोकः ३

सि॰त॰मु॰टी॰ विरुधिवीत्वं। तस्यैथा च तस्यापि गंधवत्वेबाधकाभावः॥ नानारूपेति। शुक्लनीलादिभेदेन नानाजातीयरूपं पृथिव्यामेव
वर्त्तते। नतुजलादौ। तत्र शुक्लस्यैवसत्वात्। पृथिव्यां तु एकस्मिन्नपि धर्मिणि पाकवशान् नानारूपसत्वात्। न च यत्र नानारू
१८ पं नोत्पन्नं तत्राव्याप्तिः॥ रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात्। रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजाति
मत्वस्य वा वाच्यत्वात्। वैशेषिकनये पृथिवीपरमाणोरूपनाशस्य रूपांतरस्य च सत्वात्। न्यायनये घटादावपि सत्वा
ल्लक्षणसमन्वयः। षड्विधस्तु रसस्तत्र। मधुरकटुकषायादिभेदेन यः षड्विधो रसः पृथिव्यामेव। अन्यत्र तु मधुर एव रसः। अत्रा गंधस्तु द्विविधो मतः
पि पूर्ववद्रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वं लक्षणं बोध्यं। गंधस्तु द्विविधेति। द्विविधत्वं वस्तुस्थितिमात्रं न तु द्विवि
धगंधवत्वं लक्षणं॥ द्विविधस्य व्यर्थत्वात्। द्वैविध्यं च सौरभासौरभभेदेन ज्ञेयं॥ स्पर्शेति। तस्याः पृथिव्याः अनुष्णाशीत श्रीशिव
स्पर्शवत्वं। वायावपि वर्त्तत इत्युक्तं॥ पाकज इति। इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तं। वस्तुतस्तु पा
कजस्पर्शवत्वमात्रं लक्षणं। अवैशेषिकस्य वैयर्थ्यात्। यद्यपि पाकजस्पर्शोऽपटादौ नास्ति तथापि पाकजन्यस्पर्शवद्वृत्तिद्रव्यत्व
व्याप्यजातिमत्वमर्थो बोध्यः॥ नित्यानित्येति। अनित्या नित्येति॥ सा पृथिवी द्विविधा। नित्या अनित्या चेत्यर्थः॥ अणुलक्ष
णा परमाणुरूपा पृथिवी नित्या। तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिः सर्वापि अनित्येत्यर्थः॥ सैवानित्या पृथिवीति।

सैवावयवयोगिनी॥१॥

नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा॥ अनित्या तु तदन्या स्यात्‌२ स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः॥१८॥

स्य

अवयववतीत्यर्थः॥ ननु अवयविनि किं मानं। परमाणुपुंजैरेवोपपत्तेः। न च परमाणूनां अतींद्रियत्वात् घटादेः प्रत्यक्ष
त्वं न स्यादिति वाच्यं॥ एकस्य परमाणोरप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वात्। यथा एकैकेशस्य दूरे अप्रत्यक्षत्वे
पि तत्समूहस्य प्रत्यक्षत्वं। न च एकः स्थूलो घट इति बुद्धेरनुपपत्तिरिति वाच्यं। एको महान्धान्यराशिवदुपपत्तेः। मैवं। पर
माणोरतींद्रियत्वेन तत्समूहस्यापि प्रत्यक्षत्वायोगात्। दूरस्थकेशस्तु नातींद्रियः। सन्निधाने तस्यैव प्रत्यक्षत्वात्। न
च तदानींदृश्यपरमाणुपुंजस्योत्पन्नत्वात् नप्रत्यक्षत्वेपि विरोध इति वाच्यं॥ अदृश्यस्य दृश्यानुपादानत्वात्। अन्यथा
चक्षुरूष्मादिसंततौ कदाचिद् दृश्यत्वप्रसंगात्॥ न चालितसंतैलादौ कथं महदृश्यदहनसंतते दृश्यदहनोत्पत्तिरिति वाच्यं।
तत्र तदवयवैः पातितदृश्यदहनावयवैः स्थूलदहनोत्पत्तेरभ्युपगमात्॥ न चादृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति
वाच्यं॥ यतो न वयं दृश्यत्वमदृश्यत्वं वा कुत्रचित्स्वभावादाचक्ष्महे। परं तु महत्वोद्भूतरूपादिकारणसमुदायवशात् दृश्य
त्वं। तदभावाच्चादृश्यत्वं। तथा च त्रसरेणोर्महत्वात् प्रत्यक्षत्वं न तु द्व्यणुकादेस्तदभावात्। नहीत्वन्मतेपि इदं संभवति। परमाणौ
महत्वाभावात्॥ इत्थं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षसिद्धत्वादनित्यत्वं। तेषां चावयवधारा अनंतत्वात् मे बयविनः नाः २
रुसर्षपयोरपि साम्यप्रसंगात्। अतः क्वचिद्विश्रामो वाच्यः॥ यत्र विश्रामस्तस्यानित्यत्वे असमवेतकार्योत्पत्तिप्रसंगा

सा च त्रिधा भवेद्देह इंद्रियं विषयस्तथा॥ ४

तस्य नित्यत्वे। महत्परिमाणतारतम्यस्य गगनादौ विश्रांतत्वमिव अणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रांतत्वमस्तीति
तस्य परमाणुत्वसिद्धिः॥ न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यं। त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवत् इत्यनुमानेन
तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवाः॥ महदवयवत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः॥ न चेदमप्रयोजकं।
१ अपकृष्टमहत्त्वं प्रति अनेकद्रव्यत्वस्य प्रयोजकत्वात्॥ न चैवं क्रमेण तदवयवधारापि सिध्येदिति वाच्यं। अनवस्थाभये
न तदसिद्धेरिति॥ सा च त्रिधेति। देहेति। कार्यरूपा पृथिवी त्रिधा। शरीरेंद्रियविषयभेदादित्यर्थः। तत्र देहमुदाहरति। योनि ३८
योनिजोऽयोनिजो देहः जादीति। योनिजमयोनिजं चेत्यर्थः। योनिजमपि द्विविधं॥ जरायुजमंडजं च। जरायुजं मानुषादीनां। अंडजं सर्पा
दो दीनां। अयोनिजं स्वेदजोद्भिज्जादिकं। स्वेदजाः कृमिदंशाद्याः॥ उद्भिज्जाः तरुगुल्माद्याः॥ नारकीणां शरीरमप्ययोनिजं। श्रीशिवं॰
न च मानुषादि शरीराणां पार्थिवत्वे किं मानमिति वाच्यं। गंधादिमत्त्वस्यैव प्रमाणत्वात्॥ न च क्लेदोष्मादेरुपलंभादा
प्यत्वादिकमपि स्यादिति वाच्यं॥ तथा सति जलत्वपृथिवीत्वादीनां संकरप्रसंगात्॥ चैवं तर्हि जलत्वादिकमेवास्तु। ननु
पार्थिवत्वमिति वाच्यं। क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात्। गंधाद्युपलब्धेश्च पृथिवीत्वसिद्धेः। तेन पार्थि
वादिशरीरेषु जलादीनां निमित्तत्वमात्रं बोध्यं। इत्थं च शरीरत्वं तु न जातिः पृथिवीत्वादिना सांकर्यात्। किंतु चेष्टाश्रय

त्वं॥ वृक्षादीनामपि चेष्टासत्त्वान्नाव्याप्तिः॥ चेष्टा च हिताहितप्राप्तिपरिहारार्था क्रिया न तु स्पंदनमात्रं। घटादावतिव्याप्तेः॥
न च वृक्षादेः शरीरत्वे किं मानमिति वाच्यं॥ आध्यात्मिकवायुसंबंधस्यैव प्रमाणत्वात्॥ तत्रैव किं मानमिति चेत्। भग्नक्षत
दीना संरोहणेन तदनुमानात्॥ यदि हस्तादौ शरीरव्यवहारो न भवति तदा अंत्यावयवित्वेन विशेषणीयं॥ न च यत्र शरीरे चेष्टा न ज्ञाता
तत्राव्याप्तिरिति वाच्यं। तादृशप्रमाणाभावात्॥ अथवा चेष्टावदंत्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं। अंत्यावय
विमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा॥ तेन मानुषत्वं चैत्रत्वादिजातिमादाय लक्षणसमन्वयः॥ न च नृसिंहशरीरे कथं
लक्षणसमन्वयः। तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावात्। जलीयतैजसशरीरवृत्तितया देवत्वस्यापि इंद्रियं घ्राणलक्षणं
जातित्वाभावादिति वाच्यं। कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्॥ इंद्रियमिति॥
घ्राणेंद्रियं पार्थिवमित्यर्थः। पार्थिवत्वं कथमिति चेत्। घ्राणेंद्रियं पार्थिवं रूपादिषु मध्ये गंधस्यैवाभिव्यंज
कत्वात्॥ कुंकुमगंधाभिव्यंजकघृतादिवत्। न च दृष्टांते स्वीयरूपादिव्यंजकत्वादसिद्धिरिति वाच्यं॥ परकीयरू नं॰
पाद्यव्यंजकत्वस्य तदर्थत्वात्॥ न च नवशरावगंधव्यंजकजलेन अनैकांतिकत्वमिति वाच्यं॥ तत्र रसाभि
व्यंजकत्वात्॥ यद्वा परकीयेति न देयं॥ वायूपनीतसुरभिभागस्य दृष्टांतत्वसंभवात्॥ न च घ्राणेंद्रियसंनिक

१ विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः ॥१

सि·मु· ६० र्वस्य गंधमात्रव्यंजकत्वात्तत्र व्यभिचार इति वाच्यं॥ द्रव्यत्वे सतीति विशेषणात्॥ विषय इति। उपभोगसाधनं हि विषयः। सर्व
मेव हि कार्यजातमदृष्टाधीनं यच्च कार्यं यददृष्टाधीनं तत्तदुपभोगसाक्षात्परंपरया वा जनयत्येव। न हि बीजप्रयोजनाभ्यां
उँ विना कस्यचिदुत्पत्तिरस्ति॥ तेन द्व्यणुकादिकं ब्रह्माण्डांतं सर्वमेव विषयो भवति। शरीरेंद्रिययोर्विषयत्वेपि प्रकारांतरेणो
१० पन्यासः शिष्यबुद्धिवैशद्यार्थः॥ ॥ जलं निरूपयति॥ वर्णः शुक्लः॥ स्नेहसमवायिकारणतावच्छेदकतया जलत्व प
+ जातिः सिद्ध्यतीति॥ यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यं॥ अथ पर
माणौ जलत्वं न स्यात्तत्र जन्यस्नेहाभावात्। तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमादिति चेन्न॥ जन्य
स्नेहजनकतावच्छेदकतया जन्यजलत्वजातिसिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः॥ शुक्लरूपमेव [illegible] जले श्रीशिव
ऽजलस्येति दर्शयितुं उक्तं वर्णः शुक्ल इति॥ न तु शुक्लरूपवत्त्वं लक्षणं॥ अथवा नैमित्तिकद्रवत्ववदवृत्ति शुक्लरूपवद्वृत्ति द्रव्यत्व न १०
साक्षाद्व्याप्यजातिमत्त्वं॥ अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा लक्षणार्थः॥ र
सस्पर्शाविति॥ जलस्य मधुर एव रसः॥ शीत एव स्पर्शः॥ तिक्तवदवृत्तिरसवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा लक्षणं॥ तेन
शर्करादौ नातिव्याप्तिः॥ ननु शुक्लरूपमेव कुतः॥ कालिंदीजलादौ नीलिमोपलब्धेरिति चेन्न॥ नीलजनकतावच्छेदकतया

रसस्पर्शौ जले मधुरशीतौ ॥र

प१

हि पृथिवीत्वजातेरभावात्॥ जले नीलरूपासंभवात्॥ कालिंदीजले नीलत्वप्रतीतिस्त्वाश्रयौपाधिकी भ्रांतैव॥ अत एव वियति
विक्षेपे धवलिमोपलब्धिः॥ अथ जले माधुर्यं किंमानं। न हि प्रत्यक्षेण कोपि रसस्तत्रानुभूयते। न च नारिकेलजलादौ माधुर्य
मुपलभ्यत इति वाच्यं। तस्याश्रयौपाधिकत्वात्। अन्यथा जंबीरकरवीररसादावुपलब्धेरम्लत्वादेरपि स्यादिति चेन्न। हरीत
क्यादिभक्षणस्य जलरसव्यंजकत्वात्। न च हरीतक्यामेव जलोष्मसंयोगात् रसांतरोत्पत्तिरिति वाच्यं। कल्पनागौरवात्॥ पृ
थिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जले नाम्लादिकं। जंबीररसादौ त्वाश्रयौपाधिकी तथा प्रतीतिः॥ ए
वं जलस्पर्शे तत्स्पर्शजनकतावच्छेदकत्वं जलत्वे बोध्यं॥ स्पष्टं च चंदनादौ शैत्योपलब्धिस्तु चंदनांतर्वर्त्तिशीतस्पर्शवत्सलिलस्या
तेजःसंयोगाज्जले औष्ण्यप्रतीतिरौपाधिकी स्फुटैव॥ तत्र पाकासंभवात्। स्नेहस्तत्र घृतादावपि तदंतर्वर्त्तिजलस्यैव स्नेहः॥ द्रवत्वं तु सांसिद्धिकं तथा[illegible]
जलस्यैव स्नेहसमवायिकारणत्वात्॥ तेन जल एव स्नेह इति मंतव्यं॥ द्रवत्वमिति। सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसि
सिद्धस्तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः। तैलादावपि जलस्यैव द्रवत्वं। स्नेहप्रकर्षेण च दहनानुकूल्यमिति वस्तु
तः॥ नित्यतेति। पृथिव्यादिवज्जलेप्यर्थः॥ तथा हि। जलं द्विविधं। नित्यमनित्यं च॥ परमाणुरूपं नित्यं। द्व्यणुकादि सर्वमनित्यं। अ
वयवसमवेतं च॥ अनित्यमपि त्रिविधं॥ शरीरेंद्रियविषयभेदात्॥ पृथिवीतोयविशेषस्तमाह॥ किंत्विति॥ अयोनिज

मं

नित्यतादि प्रथमवत् २

किंतु देहमयोनिजं २

इंद्रियं रसनं सिंधुर्हिमादिर्विषयो मतः ३

व्यभिचार

प्रत्यक्षानुमानं

सि॰मुक्तावली॰ मेवेत्यर्थः॥ जलीयं शरीरमयोनिजं वरुणलोके प्रसिद्धं। इंद्रियं रसनं जलीयमित्यर्थः॥ तथाहि। रसनं जलीयं गंधाद्यव्यं
जकत्वे सति रसव्यंजकत्वात्। सक्तुरसाभिव्यंजकोदकवत्॥ रसनेंद्रियसन्निकर्षव्यभिचारवारणाय द्रव्यत्वं देयं॥ विषयं दर्शयति।
सिंधुरिति॥ सिंधुः समुद्रः। हिमं तुषारः॥ आदिपदात्सरित्कासारकरकादिः सर्वोपि ग्राह्यः॥ न च हिमकरकयोः कठिनत्वात्पा
११ र्थिवत्वमिति वाच्यं॥ उष्मणा विलीनयोस्तयोः जलत्वस्य प्रत्यक्षसिद्धत्वात्। यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्त्या जलोपा
प्रति दानोपादेयत्वसिद्धेः। अदृष्टविशेषेण द्रवत्वविरोधात्। करकायां काठिन्यप्रत्ययस्य भ्रांतत्वात्॥ तेजो निरूपयति॥
स्पर्श उष्णस्तेजसस्तु ६ ॥ स्पर्श उष्ण इति। उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः॥ इत्थं च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेज श्रीशिव॰
स्त्वं जातिविशेषः॥ तस्य परमाणुवृत्तित्वं जलस्येवानुसंधेयं॥ न चोष्णस्पर्शवत्त्वं चंद्रकिरणादावव्याप्तेर्वाच्यं॥ तत्रा ११
प्योष्णसत्त्वात्॥ किंतु तदंतःपातिजलस्पर्शेनाभिभवादग्रहः। एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवात् अस्करादौ
चं ३ अनुद्भूतत्वात्तदग्रहः॥ स्याद्रूपमिति। वैश्वानरमरकतकिरणादौ च पार्थिवरूपेणाभिभवाच्छुक्लत्वाग्रहः। तद्रूपा
ग्रहे धर्मिणोपि चाक्षुषत्वं न स्यादिति चेन्न॥ अन्यदीयरूपेणैव धर्मिग्रहसंभवात्॥ शंखस्य पित्तपीतिम्ना। वह्
स्तु शुक्लरूपं नाभिभूतं किंतु तदीयं शुक्लत्वमभिभूतमित्यन्ये। नैमित्तिकं द्रवत्वं तु सुवर्णादिरूपे तेजसि तत्सत्त्वात्॥

स्याद्रूपं शुक्लं भास्वरं २ णो २ मिति

नित्यतादि च पूर्ववत् २ घृतादावतिव्याप्तेः १

दा न च नैमित्तिकद्रवत्वं न लक्षणं दहनादावव्याप्तेश्चेति वाच्यं। पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य
विवक्षितत्वात्॥ नित्यतेति॥ जलस्येवेत्यर्थः। तथाहि। तद्द्विविधं नित्यमनित्यं च। नित्यं परमाणुरूपं। तदन्यदनित्यं अवयवि इंद्रियं नयनं वह्निः सुवर्णादिर्विषयो मतः २
च॥ तत् त्रिविधं। शरीरेंद्रियविषयभेदात्॥ शरीरमयोनिजमेव। तच्च सूर्यलोकादौ प्रसिद्धं॥ अत्र यो विशेषस्तमाह। इंद्रियं
नयनं चक्षुस्तैजसं॥ परकीयस्पर्शाद्यव्यंजकत्वे सति परकीयरूपव्यंजकत्वात्॥ प्रदीपवत्। प्रदीपस्य स्वीयस्पर्शव्यंजकत्वा
न ५ त्॥ आद्यं परकीयेति देयं। घटादेः स्वीयरूपव्यंजकत्वात् व्यभिचारवारणाय द्वितीयं परकीयेति। अथवा प्रभाया
न ६ दृष्टांतत्वसंभवादाद्यं परकीयेति देयं। चक्षुःसन्निकर्षव्यभिचारवारणाय द्रव्यत्वं देयं॥ विषयं दर्शयति॥ वह्निः सुवर्णा
दिर्विषयो मतः॥ ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न। सुवर्णं तैजसं॥ असति प्रतिबंधके अत्यंतानल
संयोगेपि अनुच्छिद्यमानद्रवत्वाधिकरणत्वात्॥ यन्नैवं तन्नैवं यथा पृथिवीति॥ न चाप्रयोजकं। पृथिवीद्रवस्य चा स्वरस जलीद्रवत्वस
ग्निसंयोगनाश्यत्वात्॥ ननु पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रवत्वात्तेन व्यभिचार इति चेन्न॥ जलम
ध्यस्थमषीक्षोदवत्॥ तस्याद्रुतत्वात्। अपरे तु। पीतिमाश्रयस्याग्निसंयोगेपि रूपापरावृत्तिदर्शनात्तत्प्रतिबंध
कं जातीयं द्रवद्रव्यं कल्प्यते॥ तथाहि। अग्निसंयोगी पीतिमगुरुत्वाश्रयः रूपप्रतिबंधकविजातीयद्रवद्रव्यसं

रवि १

तोर

कंपे अपाकजोनुष्णाशीतस्पर्शस्तुपवनेमतः तिर्यग्गमनवानेषज्ञेयस्पर्शादिलिंगकः सुवर्णस्य

सि॰ मुक्तावलीप्र॰ युक्तः॥ अत्यंताग्निसंयोगेपि पूर्वरूपविजातीयरूपानधिकरणत्वात्॥ जलमध्यस्थपीतपटवत्॥ तस्य पृथि
वीजलभिन्नस्य तेजस्त्वनियमात्॥ वायुं निरूपयति॥ अपाकजेति॥ अनुष्णाशीतस्पर्शस्य पृथिव्यामपि
सत्वात् अनुक्तं अपाकज इति॥ अपाकजस्पर्शस्य जलादावपि सत्वात् अनुक्तं अनुष्णाशीत इति॥ एतेन वायो विजा
१२ वायुत्वं तीयस्पर्शो दर्शितः॥ तज्जनकतावच्छेदकं वायुत्वमिति भावः॥ एष वायुः स्पर्शादिलिंगकः॥ वायुर्हि स्पर्शशब्दधृतिकंपैरनुमी
यते॥ विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कंपेन च वायोरनुमानात्॥ यथा च वायुनभस
स्तस्तथा प्रवक्ष्यते। पूर्ववन्नित्यतायुक्तः॥ वायुर्द्विविधो नित्यानित्यश्च॥ परमाणुरूपो नित्यस्तदन्यस्त्वनित्यः समवे
तश्च। सोपि त्रिविधः॥ शरीरेंद्रियविषयभेदात्॥ तत्र शरीरं अयोनिजं पिशाचानां॥ परंतु जलीयतैजसवायवीयशरी श्री शिव
राणां पार्थिवभागस्योपष्टंभाद्भोगक्षमत्वं॥ जलादीनां प्राधान्यात् जलीयत्वादिकमपि। अत्रैवो विशेषस्तमाह।
देहव्यापित्वगिंद्रियं २ देहेति। शरीरव्यापकस्पर्शग्राहकमिंद्रियं त्वक्। तच्च वायवीयं रूपादिषु पंचसु मध्ये स्पर्शस्यैवाभिव्यंजकत्वात्॥ अंगसं १२
गिसलिलशैत्याभिव्यंजकव्यजनपवनवत्॥ विषयं दर्शयति॥ प्राणादिरिति॥ यद्यप्यनित्यो वायुश्चतुर्विधस्तस्य चतुर्विधत्वं
नें प्राणादिभेदस्तुक्तनाकरे॥ तथापि संक्षेपात्त्रैविध्यमुक्तं। प्राणस्त्वेक एव हृदादिनानास्थानवशात् मुखनिर्गमनादिनाना

प्राणादिस्तुमहावायुपर्यंतोविषयोमतः॥

आकाशस्यतुविज्ञेयःशब्दोवैशिषिकोगुणः॥१

क्रियातः नानासंज्ञां लभत इति पर्यवसितो वायुः॥ आकाशं निरूपयति॥ आकाशस्येति॥ आकाशकालदिशा
मेकैकव्यक्तिकत्वात् न जातिः। किंतु शब्दाश्रयत्वं। वैशिषिक इति कथनं तु विशेषगुणांतरव्यवच्छेदाय॥ एतेन प्र
माणमपि दर्शितं। तथाहि। शब्दो गुणः चक्षुर्ग्रहणायोग्य बहिरिंद्रियग्राह्यजातिमत्वात्॥ स्पर्शवत्॥ शब्दः द्रव्यसमवेतः के
संयोगत्व गुणत्वादित्यनुमानेन शब्दस्य द्रव्यसमवेतत्वसिद्धिः। शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणत्वाभावे
सति अकारणगुणपूर्वकप्रत्यक्षत्वात्॥ सुखवत्॥ पाकजरूपादौ व्यभिचारवारणाय अग्निसंयोगेत्युक्तं॥ प सत्यंन
टरूपादौ व्यभिचारवारणाय अकारणगुणपूर्वकेति॥ जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति॥ नादिकालमनसो
वि गुणः विशेषगुणत्वात् रूपवत्॥ नात्मविशेषगुणः॥ बहिरिंद्रियग्राह्यत्वात् रूपवत्॥ इत्थं च शब्दाधिकरणं नवमं द्रव्यं गगननाम
कं सिद्ध्यति॥ न च वायव्यवयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यं। अयावद्द्रव्यभावित्वेन वा
स्य युविशेषगुणत्वाभावात्॥ तत्र च शरीरं विषयस्य चाभावादिंद्रियं दर्शयति॥ इंद्रियं तु भवेदिति॥ नन्वाकाशं लाघवादेकं सिद्धं श्रो
त्रं तु पुरुषभेदाद्भिन्नं कथमाकाशं स्यादत आह। एकः सन्निति। आकाशः एकः सन्नपि उपाधेः कर्णशष्कुल्यादेर्भेदाद्भिन्नः
श्रोत्रात्मको भवतीत्यर्थः॥ कालं निरूपयति॥ जन्यानामिति। तत्र प्रमाणं दर्शयितु

एकःसन्नप्युपाधितः २ इंद्रियंतुभवेच्छ्रोत्रं २ जन्यानांजनकःकालोजगतामाश्रयोमतः॥

पा० २

परापरत्वधीहेतु ३

सि० मुक्तावली ० ग्राह। जगतेति॥ इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पंदादिकं यदि विषयीकरोति तदा सूर्यपरिस्पंदादिना घटादेः सं ९१
बंधो वाच्यः संयोगादिर्न संभवतीति काल एव संबंधघटकः कल्प्यते। इत्थं च तस्याश्रयत्वं सम्यक्॥ प्रमाणांतरं दर्शयति॥
परापरेति॥ परत्वादिबुद्धेरसाधारणनिमित्तं काल एव॥ परत्वापरत्वयोरसमवायीकारणसंयोगाश्रयो लाघवादतिरि
क्तः कल्प्यत इति भावः॥ ननु एकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यात्। अत आह॥ क्षणादिः स्या
दुपाधितः॥ कालस्त्वेकोपि उपाधिभेदात् क्षणादिव्यवहारविषयः॥ उपाधिस्तु। स्वजन्यविभागप्रागभावावच्छिन्नं क
र्म॥ पूर्वसंयोगावच्छिन्नविभागो वा॥ पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा॥ उत्तरसंयोगावच्छिन्नं क
र्म वा॥ न च उत्तरसंयोगानंतरं क्षणव्यवहारो न स्यादिति वाच्यं। कर्मांतरसत्वादिति। महाप्रलये क्षणादिव्यवहारो यद्यस्ति
तदा ध्वंसेनैवोपपादनीय इति॥ ॥दिशं निरूपयति॥ दूरांतिकेति। दूरत्वं अंतिकत्वं च
दैशिकपरत्वं अपरत्वं च बोध्यं॥ तद्बुद्धेरसाधारणं बीजं दिगेव॥ दैशिकपरत्वापरत्वयोरिति असमवायीकारण
संयोगाश्रयतया लाघवादेका दिक् सिध्यतीति भावः॥ ननु यद्येकैव दिक् तदा प्राची प्रतीच्यादिव्यवहारः क
थं उपपद्यते अत आह॥ उपाधिभेदादिति॥ यत्पुरुषस्योदयगिरिसन्निहिता या दिक् तत्पुरुषस्य प्राची एवमुद

१ उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक्॥

दा ॥ इनादिव्यवहारस्तु नन्त क्षणकर्तरिति ॥४॥

विभाग

श्रीशिव

क्षणादिकादि... ९३

आत्मेंद्रियाद्य० २

यगिरिव्यवहिता दिक् प्रतीची। एवं यत्पुरुषस्य सुमेरुसन्निहिता दिगुदीची॥ तद्व्यवहिता त्ववाची। सर्वेषामेव वर्षाणां
मेरुरुत्तरतः स्थितः इति नियमात्॥ आत्मानं निरूपयति॥ आत्मेंद्रियेति॥ आत्मत्वजातिस्तु सुखदुः
खादिसमवायीकारणतावच्छेदकतया सिध्यति॥ ईश्वरे सा जातिरस्त्येव। अदृष्टादिरूपकारणाभावान्न सुखदुःखो
त्पत्तिः। नित्यस्य स्वरूपयोग्यस्य फलावश्यंभाव इत्यस्याप्रयोजकत्वात्॥ परे तु॥ ईश्वरे तु सा जातिर्नास्त्येव प्रमा
णाभावात्॥ न च दशमद्रव्यत्वापत्तिः॥ ज्ञानवत्वेन विभजनादित्याहुः॥ इंद्रियाणां शरीरस्य च परं परस्याच्चैतन्यसंपा
दकः॥ यद्यप्यात्मनि अहं जाने अहं करोमीत्यादिप्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरा
दिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यते इत्यतः प्रमाणं दर्शयति॥ करणमिति। वास्यादीनां छिदा
करणानां कर्तारमंतरेण फलोपधानं न दृष्टं॥ एवं चक्षुरादीनां कर्तारमंतरेण फलोपधानमिति विभापि नोपपद्यत इत्यति
श्लो३ रिक्तः कर्ता कल्प्यते॥ ननु शरीरस्य कर्तृत्वमस्तु अत आह॥ शरीरस्येति॥ ननु चैतन्यं ज्ञानादिकं वा मुक्तात्मनां त्वन्मते इव
त्तरशरीराणां तदभावे का क्षतिः॥ प्रमाणाभावेन ज्ञानाद्यभावस्यासिद्धेरिति चेन्न॥ शरीरस्य चैतन्ये बाल्ये विलोकि
तस्य स्थविरे स्मरणानुपपत्तिः। शरीराणां अवयवोपचयापचयैरुत्पादविनाशशालित्वात्॥ न च पूर्वशरीरोत्प

३ शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः॥३

ज्ञानकरणानां ४

अधिष्ठाता॥

करणं हि सकर्तृकं॥१

॥१॥ तथात्वे चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥४८॥

नुः

सिद्धांतमुक्तावलीप्र नसंस्कारेण द्वितीयशरीरे संस्कारोत्पत्तिरिति वाच्यं॥ अनंतसंस्कारकल्पने गौरवात्॥ एवं शरीरस्य चैतन्ये बालकस्य स्तनपानादौ

प्रवृत्तिर्न स्यात्॥ इष्टसाधनताज्ञानस्य तद्धेतुत्वादिति। तदानीं इ×कल्पना×ष्टसाधनताभावकस्याभावात्॥ नन्वनेन जन्मांतरानु

भूतेष्टसाधनस्य तदानीं स्मरणादेव प्रवृत्तिः॥ न च जन्मांतरानुभूतमन्यदपि स्मर्यते इति वाच्यं॥ उद्बोधकाभावात्॥ अत्र

२५ तु जन्मांतरीयजीवनादृष्टमेवोद्बोधकं कल्प्यते॥ इत्थं च संसारस्यानादितया आत्मनोऽनादित्वसिद्धौ अनादिभाव

स्य नाशासंभवात् नित्यत्वं संभवतीति बोध्यं। ननु चक्षुरादीनां ज्ञानादौ करणत्वं कर्तृत्वं चास्तु। विरोधसाधकाभावा

दत आह॥ तथात्वे चेदिति। तथात्वं चैतन्यं। उपघाते नाशे सति अर्थाच्चक्षुरादीनामेव॥ पूर्वं चक्षुषा साक्षात्कृतानां

चक्षुरभावे स्मरणं न स्यात्॥ अनुभवितुरभावात्॥ अन्यदृष्टस्यान्येन स्मरणासंभवात्॥ अनुभवस्मरणयोः सामा श्रीशिव॥

नाधिकरण्येन कार्यकारणभावादिति भावः॥ ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत

आह॥ मनोपीति। न चेतनं। ज्ञानादीति। मनसोऽणुत्वात् प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मनसि ज्ञानसुखादिसत्वे त

त्प्रत्यक्षत्वानुपपत्तेरित्यर्थः॥ यथा च मनसो अणुत्वं तथाग्रे वक्ष्यते॥ नन्वस्तु क्षणिकविज्ञानमेवात्मा॥ तस्य तु स्वतः प्रकाशरूप २४

त्वाच्चेतनत्वं॥ ज्ञानसुखादिकं तु तस्यैवाकारविशेषः॥ तस्याभावत्वादेव क्षणिकत्वं। पूर्वपूर्वविज्ञानस्योत्तरोत्त

ख

॥२॥ मनोपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् ॥३॥

पि

एकस्मिन्प्रतिपक्षपातिनियामकः तस्याभावः २

रविज्ञाने हेतुत्वात्॥ सुषुप्तावपि आलयविज्ञानधारा निराबाधैव। मृगमदवासनायाः वसनइव पूर्वपूर्वविज्ञानजनितसंस्काराणां

उत्तरोत्तरविज्ञाने संक्रांतत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न॥ तस्य जगद्विषयत्वे सार्वज्ञ्यापत्तिः॥ यत्किंचिद्विषयत्वे विनिगमकाभा

वः॥ सुषुप्तावपि विषयावभासप्रसंगश्च॥ तदानीं निराकारस्य विज्ञानस्यानुवृत्तिरिति चेन्न॥ तस्य स्वतः प्रकाशत्वे प्रमाणाभा

दि + वात्॥ अन्यथा घटादीनामपि ज्ञानत्वापत्तिः॥ न चेष्टापत्तिर्विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यं॥ घटादेरनुभूयमान

स्यापलपितुमशक्यत्वात्॥ आकारस्तावद्विशेष एवायं विज्ञानस्येति चेत्॥ किमयमाकारोऽतिरिच्यते विज्ञानात्तर्हि समाया

तैं तं विज्ञानव्यतिरिक्तेन वस्तुना। नातिरिच्यते चेत्तर्हि समूहालंबनो नीलाकारो पीताकारस्यात्॥ स्वरूपतो विज्ञानस्या पि

विशेषात्॥ अपोहरूपा नीलत्वादिर्विज्ञानधर्म इति चेन्न। नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात्॥ इतरथा वि ज्ञानस्यैव ४

रोधावधारणस्यैव दुरुपपादत्वात्॥ न वा वासनासंक्रमः संभवति॥ मातृपुत्रयोरपि वासनावात्॥ वि[illegible]त्पाद +

कत्वेतरासंस्कारानंत्यप्रसंगः॥ क्षणिकविज्ञानेष्वतिशयविशेषः कल्प्यत इति चेन्न। मानाभावात्कल्पने गौरवाच्च॥ एत

न क्षणिकशरीरेष्वेव चैतन्यमपि प्रत्युक्तं॥ गौरवादतिशये मानाभावाच्च॥ बीजादावपि सहकारिसमवधानाभ्यामेवोपपत्तेः कुर्व नेः

द्रूपत्वाकल्पमानात्॥ न हि क्षणिकविज्ञाने गौरवं नित्यविज्ञानमेवात्मा॥ अविनाशी वा अरेऽयमात्मा आसिसंज्ञा नम

×संक्रमप्रसंगात्॥ न चोपादानोपादेयभावो नियामक इति वाच्यं॥ वासनायाः संक्रमासंभवात्॥ उत्तरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न॥ तदुत्पादकाभा॥

×समवधाना २

+ प्रिष

सि॰मु॰ वृ॰ प्र॰ नंतं ब्रह्मेत्यादिश्रुतेरिति चेन्न॥ तस्य सविषयत्वासंभवस्य प्रागेव दर्शितत्वात् निर्विषयस्य ज्ञानत्वे मानाभावात् सविषयस्याप्यनुभ
वादतो ज्ञानं भिन्नं नित्य आत्मेति सिद्धं॥ सत्यं ज्ञानमिति ब्रह्मपरं॥ जीवेष्वपि नापयुज्यते। ज्ञानाद्यानन्दरूपत्वादिभिर्जीवानां पर
स्परं भेदसिद्धौ सुतरामीश्वरभेदः॥ अन्यथा बंधमोक्षानुपपत्तेः। योऽपीश्वराभेदबोधको वेदः सोऽपि तदभेदेन तदीयत्वं प्रतिपादयन्
१५ स्तौति। अभेदभावनयैव यतितव्यमिति वदति। अत एव सर्व एवात्मानः समर्पिता इति स्मर्यते। मोक्षदशायां अज्ञाननिवृत्तौ वृभे
दाज्ञायत इत्यपि न। भेदस्य नित्यत्वेन नाशायोगात्॥ भेदनाशे व्यक्तिद्वयं स्यादस्य त्वे च॥ न च द्वित्वमपि नस्यतीति वाच्यं। न च निर्द्व
र्मिके आत्मनि सत्यत्वाभावेऽपि सत्यस्वरूपतादिति वा द्वित्वाभावेऽपि द्व्यात्मको जातिविशिष्टवचनत्वात्। मिथ्यात्वाभावाधिकरणत्व व्याकेद
व्यार कस्तत्र सत्यत्वमिति चेत् एकत्वाभावो द्व्यात्मको द्वित्वमित्युच्यतां। प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्द्वित्वं गंधवदिति व शीशिव॰
दुभयं नैकमित्यस्य सर्वजनसिद्धत्वात्॥ योऽपि तदानीमभेदप्रतिपादक आगमः सोऽपि निरंजनत्वादिना साम्यं प्रतिपादयतीति।
संपदाधिक्ये पुरोहितोऽयं राजा संवृत्त इतिवत्॥ अत एव निरंजनः परमं साम्यमुपैतीति श्रूयते। ईश्वरोऽपि ज्ञानसुखवान्॥ किंतु १५
ज्ञानादाश्रयोऽनित्यविज्ञानमानंदं ब्रह्मेत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः। यः सर्वज्ञ इत्याद्यनुरोधात्॥ आनंदनित्यस्या
प्यानंदवदित्यर्थः॥ आनंदोऽपि दुःखाभावेन उपचर्यते। भाराद्यपगमे सुखी संवृत्तोऽहमितिवत्। असुखवान्दिनानन्दोन वा।

ससर्वविन्

न२ वानंदः। असुखमिति श्रुतेर्वैधलेसुखं यस्येति कुतो नार्थ इति चेन्न। क्लिष्टकल्पनापत्तेः प्रकरणविरोधाच्च। आनंदमि
त्यत्र मत्वर्थीयाच् प्रत्ययविरोधादिति संक्षेपः। एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः। किंतु चेतनः कार्यका
रणयोरभेदात्कार्यनाशे सति कारणरूपतया नाशेऽनस्यादित्यकारणत्वात्। तस्य बुद्धिगतचैतन्याभिमानोऽन्यथानुपप
त्त्यानतत्कल्पनं। बुद्धिश्च प्रकृतेः परिणामः। सैव महत्तत्त्वमंतःकरणमित्युच्यते। तत्सत्वोऽसत्वात्। अन्यथा पुरुषस्य संसारोप
वर्गौ। तस्यापि एवं इंद्रियप्रणालिकया परिणतिज्ञानसुखादिना संबंधः। पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च
भेदाग्रहणात्। ममेदं कर्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया तत्प्रतिबिंबाद्वास्तविकः॥ दर्पणस्येव मुखोपरागः। इ
दमिति विषयोपरागः इंद्रियप्रणालिकया परिणतिभेदस्तात्त्विकः। निश्वासाभिहतदर्पणस्येव मलिनिमा। कर्तव्यमिति
व्यापारांशस्तेनांशत्रयवती बुद्धिः। तत्परिणामेन पुरुषस्यातात्त्विकः संबंधः। दर्पणमलिनिम्नेव मुखस्यानुपलब्धिरु
च्यते॥ ज्ञानं च सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव। वृत्तिसामानाधिकरण्येन प्रतीतेः॥ न च बुद्धिश्चेतना॥
परिणामित्वादिति मतं न पास्तं। ज्ञातत्वदृष्टज्ञानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेः तद्भिन्ने भानाभावात्। चेतनो
हं करोमीति प्रतीतेः। चैतन्याशो नमस्तीति चेत्तस्य शरीरे किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसं

५धर्माधर्माश्रयोध्यक्षो ५॥ ने २

सि॰मु॰कावली॰प्र॰ सारावलिः। अचेतनायाः प्रकृतेः कार्यत्वात् बुद्धेश्चैतन्यं कार्यकारणयोस्तादात्म्यादिति चेन्न। असिद्धेः। कर्तृजन्यत्वेनाभावा
त्। वीतरागजन्मादर्शनात् अनादित्वे। अनादेर्नाशासंभवात् नित्यत्वं तत् किं प्रकृत्यादिकल्पनेन। न च प्रकृतेः क्रियमाणानि गुणैः कर्मा
णि सर्वशः। अहंकारविमूढात्मा कर्ताहमिति मन्यते इत्यनेन विरोध इति वाच्यं। प्रकृतेः [illegible] गुणैः [illegible] जन्यैरिच्छादिभिः कर्ताहमि
१६ ति चेत्यस्य तदर्थत्वात्। नन्वेवं सति कर्तारमात्मानं केवलं तु यः इत्यादिवदता भगवता प्रकटीकृतोयमुपरिष्टाद् आशय इति संक्षेपः। वेशोषगुणभागात्मा ५
धर्माधर्मेति॥ आत्मेत्यनुषज्यते। शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणां देहान्तरेण भोगानुपपत्तेः। विशेषगुणेति। योग्यगु प्रत्याद्यनुमेयायं
णसंबन्धेन। मनः प्रत्यक्षं भवति नत्वन्यथा॥ अहं जाने अहं करोमीति प्रतीतेः। प्रवृत्त्यादीति। आत्मा परदेहादौ प्रवृत्त्या धनुमीय
चेष्टया ते॥ प्रवृत्तिरत्र चेष्टा। ज्ञानेच्छाप्रयत्नादीनां देहे अभावस्योक्तत्वात्॥ चेष्टाया श्च प्रयत्नसाध्यत्वात् प्रयत्नवान् आत्मानुमी श्रीशिव
यत इति भावः। तत्र दृष्टान्तमाह। रथगत्येति। यद्यपि रथस्य कर्म चेष्टा न भवति तथापि तेन कर्मणा सारथिर्यथानुमीयते तथा चे
ष्टात्मकेन कर्मणा आत्मापीति भावः॥ अहंकारस्येति। अहंकारोहमिति प्रत्ययस्तस्याश्रयो विषय आत्मा न शरीरादिरिति॥ म १६
नोमात्रेति। मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषय इत्यर्थः। मानसप्रत्यक्षविषयश्च त्वर्थः रूपादिराभावेनेन्द्रियान्तरायोग्यत्वात्॥ विभुः॥
विभुत्वं परममहत्परिमाणवत्त्वं॥ तदप्येवमुक्तं पूर्वमपि स्पष्टार्थमुक्तं॥ बुध्यादिगुणावान् बुद्धिः करणं तुः इच्छादयश्च ते [illegible]
॥मनोमात्रस्यगोचरः॥२॥ रथगत्येव सारथिः॥७॥ अहंकारस्याश्रयोहं॥३॥ द्यु २

×एतासां चतसृणां करणानि चत्वारि प्रमाणानि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि।२
१ अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा॥ प्रत्यक्षमप्यनुमितिस्तथोपमितिशाब्दजे॥४॥
१ बुद्धिस्तु द्विविधा मता॥१
×ज्ञानंव्यपदेश्यमव्यभिचारिव्यवसायात्मकं ३
गुणाः पर्वनिरुक्ता वेदितव्याः। अत्रैव प्रसंगात् बुद्धेः कतिपयं प्रपंचं दर्शयति। बुद्धिस्त्विति। द्वैविध्यमुत्पादयति। अनुभूतिरिति। प्रत्यक्ष
मिति। इन्द्रियजन्यं ज्ञानं प्रत्यक्षं। यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं तथापि इन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने कारणत्वं त
त्प्रत्यक्षमिति विवक्षितं। ईश्वरप्रत्यक्षं तु न लक्ष्यं। इन्द्रियार्थसन्निकर्षोत्पन्नमिति सूत्रे तथैवोक्तत्वात्। अथवा ज्ञानाकरणकं
ज्ञानं प्रत्यक्षं॥ अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणे अनुभवस्य करणत्वात्
न तत्रातिव्याप्तिः। इदं लक्षणं ईश्वरप्रत्यक्षसाधारणं। परामर्शजन्यं ज्ञानमनुमितिः। यद्यपि परामर्शप्रत्यक्षादिकं परामर्शज
न्यं तथापि परामर्शजन्यं हेत्वविषयकं ज्ञानमनुमितिः। [illegible] न च कादाचित्कहेतुविषयकानु
मितावव्याप्तिरिति वाच्यं। तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। अथवा व्याप्तिज्ञानकरणकं
ज्ञानमनुमितिः। एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः। पदज्ञानकरणकं ज्ञानं शाब्दबोधः। वस्तुतस्तु अयं किंचिदनुमितित्व
सत्ति २ मनुमानादाय तत्र [illegible] प्रत्यक्षसाक्षिका जातिरनुमितित्वमनुमितिलक्षणं। एवं यत्किंचिल्लक्षणादिशक्तिर्दायत व्यक्तिरवश्यमनुमित्य
जाति २ दर्तिर्न लक्षणप्रत्यक्षादिकं वाच्यमिति॥ घ्राणजादीति। घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसमिति षड्विधं प्रत्यक्षं॥ न च [illegible]
लक्षणस्याभिमतत्वान्न संत्वं॥ नन्वप्रत्यक्षस्यैव निरूपणीयत्वात्॥ उक्तसूत्रानुसारात्॥ घ्राणस्य गोचरो गन्धो [illegible] त्वादिरपिस्मृतः॥
लोर२ प्रत्यक्षंतिभजते घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतं॥२॥

२ उद्भूतरूपं नयनस्य गोचरं द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये। विभागसंयोगपरापरत्वे स्नेहद्रवत्वं परिमाणयुक्तं २

मध्ये २ तथा रसो रसनाग्राह्यस्तथा शब्दोऽपि च श्रुतेः ॥२ वा क्रियां जातिं योग्यवृत्तिं समवायं च तादृशं ॥३

सि॰मु॰प्रक॰ घ्राणग्राह्य इत्यर्थः॥ गंधत्वादिरित्यादिना समवायादिपरिग्रहः॥ गंधप्रत्यक्षत्वात् तद्वृत्तिजातिरपि प्रत्यक्षा। गंधाश्रयग्रहणे तु घ्राणस्य
न सामर्थ्यमिति बोध्यं। तथा रसेति। रसत्वादिसहित इत्यर्थः। तथा शब्दोऽपि शब्दत्वादिसहितः। गंधो रसश्चोद्भूतो बोध्यः। उद्भूतरूपमिति। ग्रीष्मोष्माद
वनुद्भूतरूपमिति न तत्प्रत्यक्षं तद्वन्तीति। विभागसंयोगेति। क्रियां जातिरिति। क्रिया जातिः पृथक्त्वादिकमपि योग्यव्यक्ति गृह्णाति चक्षुः संबंधाद
१७ वृत्ति बोध्यं॥ तादृशं। योग्यव्यक्तिवृत्तिरित्यर्थः॥ चक्षुर्योग्यत्वमेव कथमत आह॥ गृह्णातीति॥ आलोकसंयोगोद्भूतरूप आलोकोद्भूतरूपयोः ॥
च चाक्षुषप्रत्यक्षे कारणं॥ तयोर्द्रव्यचाक्षुषं प्रति समवायसंबंधेन कारणत्वं। द्रव्यसमवेते तु द्रव्यप्रत्यक्षे स्वाश्रयसमवा रूपा॰
यसंबंधेनेति। द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेनेति॥ उद्भूतस्पर्शमिति। स
पि उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः॥ रूपान्यच्चक्षुषेति। द्रव्याध्यक्षेति॥ रूपभिन्नं रूपत्वादिभिन्नं यच्चक्षुर्योग्यं तत्त्वगिंद्रिय
पि४ स्यापि ग्राह्यं॥ तथा च पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ताः एवं क्रियादय एवं जातयो योग्यवृत्तयश्च त्वचो ग्राह्या इति॥ अ श्रीशिव
पि२ पि त्वगिंद्रियजन्ये द्रव्यप्रत्यक्षे रूपं कारणमिति। नवीनास्तु बहिर्द्रव्यप्रत्यक्षे न रूपं न कारणं। प्रमाणाभावात्। किंतु चाक्षुष
प्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे च स्पर्शः कारणं। अन्वयव्यतिरेकात्॥ बहिरिंद्रियप्रत्यक्षमात्रे किं कारणमिति चेन्न किंचित्॥ आत्म १७
वृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु। रूपस्य कारणत्वे तु ला ×द्रव्य× ... मिति चेन्न। वायोस्त्वगिंद्रियेणापि ग्रह
॥५ रूपान्यच्चक्षुर्योग्यं रूपमत्रापि कारणं॥ द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणं॥६॥ ६ उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ॥५
३॥ तथा च बहिरिंद्रियजन्यद्रव्यप्रत्यक्षमात्रे कारणमिति॥ ३
रूपे१

णप्रसंगः प्रसंगात्॥ इष्टापत्तिरिति चेत् स्पर्श एव लाघवात् कारणमस्तु। प्रभायाः अप्रत्यक्षत्वं विषयापत्तिरित्येव किं न स्यात्॥ तस्मात् प्रभां
पश्यामीति प्रतीति बहुरपि स्पृशामीति प्रत्ययसत्त्वात् द्वयोरपि प्रत्यक्षं भवत्येव। बहिरिंद्रियप्रत्यक्षमात्रे तु न रूपस्य न च स्पर्शस्य हेतुत्वं।
वायुप्रत्यक्षेऽप्रमेययोरेकत्वं गत्यतएव। क्वचिद्द्वित्वादिकमपि। क्वचित्संख्यापरिणामाद्यग्रहो दोषादित्याहुः॥ त्वचो योग इति। त्व
ङ्मनःसंयोगः ज्ञानसामान्ये प्रति कारणमित्यर्थः॥ किं तत्र प्रमाणं। सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञा
नाजननमिति। ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणं वा। नाद्यः। अनुभवसामग्र्यभावात्॥ तथा हि। प्रत्य
क्षे चक्षुरादीनां सहमनःसंयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादिप्रत्यक्षं। ज्ञानादेरभावादेव न मानसप्रत्यक्षं
ज्ञानाद्यभावादेव च आत्मनोऽपि न प्रत्यक्षमिति॥ व्याप्तिज्ञानाभावादेव नानुमितिः॥ सादृश्यज्ञानाभावान्नोपमितिः॥ पद
ज्ञानाभावान्न शाब्दबोध इति अनुभवसामग्र्यभावान्नानुभवः। उद्बोधकाभावाच्च न स्मरणं। मैवं। सुषुप्तिप्राक्का
लोत्पन्नेच्छादिव्यक्तेरात्मसंबंधेनात्मनश्च प्रत्यक्षप्रसंगात्॥ तदतींद्रियत्वमानाभावात्। सुषुप्तिप्राक्काले निर्विकल्पकं ते
वर्निर्विकल्पकेन ज्ञानमपलदृस्यपि प्रमाणाभावात्॥ अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्य
क्षकाले त्वाचप्रत्यक्षं स्यात्॥ विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात्। परस्परप्रतिबंधादेकमपि न स्या

सिद्धांतमुक्ता

३ मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः २ ॥ ४ ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ॥

सिं॰मु॰व॰प्र॰ण॰ दिति॥ अत्र केचित्। पूर्वोक्तयुक्त्या त्वङ्मनोयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धकत्वं अनुभवानु
रोधात्कल्प्यत इति। अन्ये पि सुषुप्त्यनुरोधात् आत्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यं चाक्षुषादिप्रत्यक्षकाले त्वङ्म
१९ नःसंयोगाभावान्न त्वाचप्रत्यक्षमिति। मनोग्राह्यमिति। मनोजन्यप्रत्यक्षविषय इत्यर्थः। ज्ञातिर्ज्ञानं। कृतिर्यत्नः॥ एवं
पि रूपत्वादिकमपि मनोग्राह्यम्। एवमात्मापि मनोग्राह्यः॥ किन्तु मनोमात्रस्य गोचर इत्यनेन पूर्वमुक्तत्वादत्र नोक्तः॥ ज्ञान
दि मिति॥ चक्षुःसंयोगाद्यनन्तरं घट इत्याकारकं घटत्वादिविशिष्टज्ञानं न संभवति। पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभा
वात्॥ विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्। तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाहि ज्ञानं तस्य प्रत्य
क्षं न भवति॥ घटमहं जानामीति प्रत्ययात्॥ तत्रात्मनि ज्ञानं प्रकारीभूतं भासते। ज्ञाने घटस्तत्र घटत्वं प्रकारः
स एव विशेषणमित्युच्यते॥ विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते॥ विशेषणतावच्छेदकप्र श्रीशिव
घगाहि२ कारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणं॥ निर्विकल्पके च घटत्वादिकं न प्रकारः तेन घटत्वादिविशिष्टघटादिवै १९
शिष्ट्यज्ञानेन न संभवति॥ घटत्वादिप्रकारकं च घटादिविशिष्टज्ञानं न संभवति। जात्यतिरिक्तपदार्थज्ञानस्य किं
चिद्धर्मप्रकारकत्वनियमात्। महत्त्वं षड्विधे हेतुरिति। द्रव्यप्रत्यक्षे महत्त्वं समवायसंबन्धेन कारणं। द्रव्यसमवेता

भा॰२ ॥६॥ वैशिष्ट्यानवगाहि ज्ञानं जायते। तदेव निर्विकल्पकं। तच्चाप्रत्यक्षं। दि तथाहि २

घ्राणजरसनादि

इंद्रियं॰२

नां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसंबंधेन। द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वरूपत्वादीनां प्रत्यक्षे
स्वाश्रयसमवेतसमवायसंबंधेन कारणमिति। इंद्रियमिति। अत्रापि षड्विध इत्यनुषज्यते। इंद्रियत्वं तु न जातिः। पृथिवीत्वा
दिना सांकर्यात्। किं चाशब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिंद्रियत्वं॥ आत्मादिवार
स्या णाय सत्यंतं। उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वाच्छब्देतरेति। विशेषगुणरूपादेश्चक्षुरादौ सत्त्वादुद्भूतेति। उद्भूतत्वं जातिः
शुक्लत्वादिना सांकर्यात्। न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यं। उद्भूतरूपत्वादीनां चाक्षुषादौ जनकत्वे अनु
पपत्तेः॥ किन्तु शुक्लत्वादिव्याप्यमनुद्भूतत्वं नाना॥ तदभावकूटश्चोद्भूतत्वं तच्च संयोगादावप्यस्ति॥ तथा च शब्देतरोद्भूत
गुणाः संयोगादिश्चक्षुरादौ अस्त्यतो विशेषेति। कालादिवारणाय विशेष्यदलं। इंद्रियावयवविषयसंयोगस्यापि प्रत्यक्ष ५४
जनकत्वादिंद्रियावयववारणाय। कालादौ रूपाभावप्रत्यक्षे संनिकर्षघटकतया कारणीभूतचक्षुःसंयोगाश्रयस्य का
लादेर्वारणाय च मनःपदं॥ ज्ञानकारणेत्यपि तद्वारणाय॥ करणमिति। असाधारणकारणं करणं। असाधार
णत्वं व्यापारवत्त्वं॥ विषयेंद्रियेति। व्यापारः सन्निकर्षः सोपि षड्विधः॥ सन्निकर्षमुदाहरणद्वारा दर्शयति॥ द्रव्यग्र

२ विषयेंद्रियसंबंधो व्यापारः सोपि षड्विधः॥५॥ करणमत्र २

द्रव्यग्रहस्तकसंयोगात्संयुक्तसमवायतः॥ द्रव्येषुसमवेतानां तथात्तत्समवायतः॥ तत्रापिसमवेतानां शब्दस्यसमवायतः॥ तद्वृत्तीनां समवेतसमवायेनतुग्रहः॥ विशेषणत
यातद्वदभावानांग्रहोभवेत्॥ यदिस्यादुपलभ्येतेत्येवंयत्रप्रसज्यते॥ प्रत्यक्षंसमवायस्यविशेषणतयाभवेत्॥

वैशेषिक=

सि०मु०वे०प्रकर० हिवेति॥ द्रव्येषुसमवेतानामिति॥ तत्रेति॥ तद्वृत्तीनामिति॥ विशेषणमिति॥ प्रत्यक्षमिति॥ द्रव्यप्रत्यक्षंइंद्रियसंयोगजन्यं॥ द्रव्यसम
वेतप्रत्यक्षंइंद्रियसंयुक्तसमवायजन्यं। एवमग्रेपि। वस्तुतस्तुद्रव्यचाक्षुषंप्रतिचक्षुःसंयोगःकारणं। द्रव्यसमवेतचाक्षुषप्र
तिचक्षुःसंयुक्तसमवायः। द्रव्यसमवेतसमवेतचाक्षुषप्रतिचक्षुःसंयुक्तसमवेतसमवायः॥ एवमन्यत्रापिविशिष्यैव
११ कार्यकारणभावः॥ परंतुपृथिवीपरमाणुनीलेनीलत्वेपृथिवीपरमाणौपृथिवीत्वेचचाक्षुषापत्तिःकथंनस्यादिति॥ तत्र
परंपरयाउद्भूतरूपसंबंधस्यमहत्वसंबंधस्यचविद्यमानत्वात्। तथाहि। नीलत्वेजातिरेकैवघटनीलेपरमाणु
नीलेचवर्तते। तथाचमहत्वसंबंधोघटनीलमादायवर्तते॥ उद्भूतरूपसंबंधस्तुउभयमादायैववर्त्तते॥ एवंपृथिवीत्वेप
टात्मिकमादायमहत्वसंबंधोबाध्यः। एववायौतदीयस्पर्शादौचसत्तायाश्चाक्षुषप्रत्यक्षंस्यात्तस्मादुद्भूतरूपावच्छिन्न श्रीशिव
महत्वावच्छि चक्षुःसंयुक्तसमवायस्यद्रव्यसमवेतचाक्षुषेतादृशचक्षुःसंयुक्तसमवेतसमवायस्यद्रव्यसमवेत[redacted]चाक्षुषे का ११
रणत्वंवाच्यं॥ एवंचपरमाणुनीलादौननीलत्वादिग्रहः। परमाणौचक्षुःसंयोगस्यरूपावच्छिन्नत्वाभावात्॥ एव
वाय्वादौनसत्तादिचाक्षुषंतत्रचक्षुःसंयोगस्यरूपावच्छिन्नत्वाभावात्। एवंयत्रघटस्यपृष्ठावच्छेदेनालोकसंयो
गःचक्षुःसंयोगस्त्वग्रावच्छेदेन॥ तत्रघटप्रत्यक्षाभावात्॥ आलोकसंयोगावच्छिन्नत्वंचक्षुःसंयोगविशेषणं
समवेते४

वं१ त्वंदेयं॥ एवंद्रव्यस्पार्शनप्रत्यक्षेत्वक्संयोगःकारणं। द्रव्यसमवेतस्पार्शनप्रत्यक्षेत्वक्संयुक्तसमवायः। द्रव्यसमवेत
समवेतस्पार्शनप्रत्यक्षेत्वक्संयुक्तसंयुक्तसमवेतसमवायः॥ अत्रापिमहत्वावच्छिन्नत्वंउद्भूतस्पर्शावच्छिन्नत्वंपर्यवसे
वबोध्यं। एवंगंधप्रत्यक्षेघ्राणसंयुक्तसमवायः। गंधसमवेतस्यघ्राणजप्रत्यक्षेघ्राणसंयुक्तसमवेतसमवायः॥ रसप्रत्यक्षेरसनसं
युक्तसमवायःकारणं। रससमवेतस्यरासनप्रत्यक्षेरसनासंयुक्तसमवेतसमवायःकारणं। शब्दप्रत्यक्षेश्रोत्रावच्छिन्नसमवायः। शब्दसमवेतप्रत्य श्रोत्रावच्छिन्न=
समवेतसमवायः। सर्वत्रप्रत्यक्षलौकिकंबोध्यं। वक्ष्यमाणंप्रत्यक्षंइंद्रियसंयोगादिकंविनापिभवति। एवंआत्मनःप्रत्यक्षेमनःसं
योगः। आत्मसमवेतमानसप्रत्यक्षेमनःसंयुक्तसमवायः। आत्मसमवेतसमवेतमानसप्रत्यक्षेमनःसंयुक्तसम
वेतसमवायःकारणं। अभावसमवायप्रत्यक्षेचइंद्रियसंबद्धविशेषणताहेतुः॥ वैशेषिकैस्तुनसमवायःप्रत्यक्षः॥ अत्र
यद्यपिविशेषणतानानाविधा॥ तथाहि॥ भूतलादौघटाभावःसंयुक्तविशेषणतयागृह्यते। संख्यादौचरूपाद्यभावःसंयु
क्तसमवेतविशेषणतया। संख्यात्वादौचरूपत्वाभावःसंयुक्तसमवेतसमवेतविशेषणतया॥ शब्दाभावःकेवलंश्रोत्रावच्छिन्न
विशेषणतया। कादौखत्वाद्यभावःश्रोत्रावच्छिन्नसमवेतविशेषणतया। एवंकत्वावच्छिन्नाभावेखत्वाभावादिकंविशेष
णविशेष्यतया। घटाभावादौपटाद्यभावःसंयुक्तविशेषणविशेषणतया। एवमन्यदप्यूह्यं। तथापिविशेषणत्वेनैकैवसा
यंद्रिस्यादिति। अभावप्रत्यक्षेयोग्यानुपलब्धेःकारणं५

योगि २

सि०मुक्ता०प्र० गृह्यते। अन्यथा घटादिसन्निकर्षे ज्ञानेतिप्रतियोगिनो योग्यताहन्यतेति॥ यदि स्यादुपलभ्येतेत्येवंरूपप्रसञ्जनेति॥
अभावप्रत्यक्षे योग्यानुपलब्धिः कारणं॥ तथा हि। भूतले घटादिज्ञाने घटाभावादिकं न ज्ञायते। तेनाभावो
पलंभे प्रतियोग्युपलंभाभावः कारणं। तत्र योग्यतापेक्षिता। सा च प्रतियोगिसत्वप्रसंजनप्रसंजितप्रतियोगिक
२० त्वरूपा॥ तदर्थश्च। प्रतियोगिनो घटादेः सत्वप्रसक्त्या प्रसंजितउपलंभरूपः प्रतियोगी यस्य सउपलंभाभा
वोऽभावप्रत्यक्षे हेतुः॥ तथा हि। यत्रालोकसंयोगादिकं वर्त्तते तत्र यदि घटः स्यात् तर्हि उपलभ्येत इत्यापाद
यितुं शक्यते तत्र घटाभावादेः चाक्षुषप्रत्यक्षं भवति। अंधकारे तु नापादयितुं शक्यते। तेन घटाभावादेश्च श्रीशिव
क्षुषप्रत्यक्षं न भवति स्पार्शनप्रत्यक्षं तु भवत्येव। आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्यापाद
यितुं शक्यत्वात्॥ गुरुत्वादिके यद्योग्यं तदभावस्य न प्रत्यक्षं॥ तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्य २०
त्वात्। वायौ उद्भूतरूपाभावः पाषाणे सौरभाभावः गुडे तिक्ताभावः वायौ पीताभावः वह्नौ अनुष्णत्वाभावः श्रोत्रे शब्दाभा
वः आत्मनि सुखाद्यभावः एवमादयः तत्तदिंद्रियेण गृह्यते। तत्तत्प्रत्यक्षस्यापादयितुं शक्यत्वात्। संस

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः॥ सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा २
र्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता। अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यतापेक्षिता। स्तंभादौ पिशाचादिभेदस्यापि चक्षुषा
गृह्यते। एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधं। तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षो वर्णितः। अलौकिकसन्निक
र्षमाह इति। अलौकिक इति। सामान्यलक्षणेति। व्यापारः सन्निकर्षः। सामान्यलक्षणेति। सामान्यलक्षणमित्य
स्यार्थः। तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपप्रत्यासत्तिरित्यर्थो लभ्यते॥ तत्र इंद्रियसंबद्ध
विशेष्यकज्ञानप्रकारीभूतं बोध्यं। तथा हि। यत्र चक्षुरिन्द्रियसंयुक्तो धूमादिः तद्विशेष्यकं धूम इति ज्ञानं तत्र ज्ञाने ध
मत्वं प्रकारः। तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवंरूपं सकलधूमविषयकं ज्ञानं जायते। तत्र यदि इंद्रियसंबंध
मित्येवोच्यते तदा धूलीपटले धूमभ्रमानंतरं सकलधूमविषयकं ज्ञानं न स्यात्। तत्र धूमत्वेन सह इंद्रियसं
बंधाभावात्॥ मन्मते इंद्रियसंबंधो धूलीपटलं तद्विशेष्यकं धूम इति ज्ञानं तत्प्रकारीभूतं धूमत्वं प्रत्यासत्तिः॥ इं
द्रियसंबंधश्च लौकिको ग्राह्यः। इदं च बहिरिंद्रियस्थले। मानसस्थले तु। ज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः।
परं तु समानानां भावः सामान्यं न। क्वचिन्नित्यं धूमत्वादि॥ क्वचिदनित्यं घटादिः। यत्र कपालः संयोगसंबंधेन
सं १

आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ९
तथाच

सि॰मुक्ता॰ मकर॰ नम्र तत्र समवायेन कपालेन वाह्यात तत्तदनंतरं सर्वेषामेव तद्घटवत्ताया तत्कपालादीनां कपालादीनां वा ज्ञानं भवति तत्रैव बोध्यं।
परंतु सामान्यं येन संबंधेन ज्ञायते तेन संबंधेन। अधिकरणानां प्रत्यासत्तिः। यत्र तत्र घटनाशानंतरं तद्घटवत्तास्मर
णं जातं तत्र सामान्यलक्षणया सर्वेषां तद्घटवत्तामानं न स्यात्॥ सामान्यस्य तदानीमभावात्। किंच इंद्रियसंबंधविशे
२१ ष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इंद्रियसंबंधं विनापि तद्घटज्ञानप्रकारीभूतसामान्यस्य सत्त्वात् तादृशज्ञानं कु
तु तो न जायेत। तस्मात् सामान्यज्ञानं प्रत्यासत्तिर्न सामान्यमित्याह। आसत्तिराश्रयाणामिति। प्रत्यासत्तिरित्यर्थः॥
तथाच सामान्यं सामान्यलक्षणे। अत्र लक्षणशब्दस्य विषयोऽर्थः। तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो
ननु लभ्यते। चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं निष्पत्तरं ति प्रत्यासत्तिरित्यर्थः॥ तथाच सामान्यलक्षणेत्य श्रीशिव
त्र लक्षणशब्दस्य विषयोऽर्थः॥ तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते। ननु चक्षुःसंयोगादिकं वि २१
नापि सामान्यज्ञानं यत्र वर्तते तत्र सकलघटादीनां चाक्षुषप्रत्यक्षं स्यादत आह। तदींद्रियेति। अस्यार्थः।
यदा बहिरिंद्रियेण सामान्यलक्षणाज्ञानं जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यज्ञानस्य तदिंद्रियजन्यत्वं

१ यद्घटादीनां मतसज्ञाने ७२
२ तदिंद्रियस केन धर्मिबोधसामान्यापेक्षते २

३ विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ३

मन्यपेक्षितेति। सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकं। तेनांधकारादौ चक्षुरादीनां तादृशं ज्ञानं न जन्यते। न
नु ज्ञानलक्षणा प्रत्यासत्तिर्ज्ञानरूपा यदि सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यात्। अत आह॥
विषयीति। सामान्यज्ञानस्य प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति॥ ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञा
नं तस्यैव प्रत्यासत्तिरिति। अत्रायमर्थः। प्रत्यक्षे सन्निकर्षं विना भानं न संभवति धूमत्वेन सकलधूमानां वह्नि
त्वेन सकलवह्नीनां च भानं कथं भवति तदर्थं सामान्यलक्षणा स्वीक्रियते। न च सकलवह्निधूमभानाभावे का क्षति
रिति वाच्यं॥ प्रत्यक्षधूमे वह्निसंबंधस्य गृहीतत्वात्॥ अन्यधूमस्य चानुपस्थितत्वात्। धूमो वह्निव्याप्यो न वे
ति संशयस्यानुपपत्तेः॥ मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालांतरीयधूमे वह्निव्याप्यत्वसंदे २४
हः संभवति। न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिरिति वाच्यं। प्रमेय
त्वेन सकलप्रमेयसन्निकृष्टे सार्वज्ञ्यापत्तिरिति वाच्यं। प्रमेयत्वेन सकलप्रमेयज्ञाने जातेपि विशिष्य सक
लपदार्थानामविज्ञातत्वेन सार्वज्ञ्याभावात्। एवं ज्ञानलक्षणास्वीकारे सुरभि चंदनमिति ज्ञाने सौरभस्य

१णा८१

॥४॥ युक्तस्य सर्वदा भानं चिन्तासहकृतोपरः॥४॥ युक्तयुञ्जानभेदतः॥३॥ योगजो द्विविधः प्रोक्तो २

सिद्धान्त० मु० प्रक० भानं न स्यात्॥ यद्यपि सामान्यलक्षणयापि सौरभस्य भानं संभवति। तथापि सौरभत्वस्य भानं ज्ञानलक्षणया॥
एवं यत्र धूलीपटले धूमत्वेन तत्र धूलीपटलस्य अनुव्यवसाये भानं ज्ञानलक्षणया॥ योगज इति। योगाभ्यासजनि
तो धर्मविशेषः। श्रुतिप्रमाणादिप्रमाणकः इत्यर्थः। युक्तयुञ्जानेति। युक्तयुञ्जानरूपयोगिद्वैवि
२२ ध्याद्धर्मस्यापि द्वैविध्यमिति भावः। युक्तस्येति। युक्तस्य तावद्योगजधर्मसहायेन मनसा आकाशपर
माण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवति तु न हानि। द्वितीयस्य चिन्ताविशेषोपि सहकारीति। यो
गजो द्विविधः इति योगिनो द्विविधाः॥ ॥इति श्रीविश्वनाथपञ्चाननविरचितायां सिद्धान्तमु श्रीशिव
क्तावल्यां प्रत्यक्षपरिच्छेदः॥ ॥श्री॥ व्यापारस्त्विति। अनुमायामनुमितौ व्याप्तिज्ञानं कर
णं परामर्शो व्यापारः॥ तथाहि॥ येन पुरुषेण महानसादौ धूमे वह्निव्याप्तिर्गृहीता पश्चात् स एव पुरुषः क्व २
चित्पर्वतादौ अनवच्छिन्नमूलां धूमलेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवंरूपं व्याप्तिस्म
रणं भवति पश्चात् अयं वह्निव्याप्यधूमवानिति ज्ञानं भवति स एव परामर्श इत्युच्यते। तदनन्तरं पर्वतो व
य

ले२ ४ व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्॥ अनुमायां॥४

२ अनुमायां ज्ञायमानं लिङ्गं तु करणं न हि २ अनागतादिलिङ्गेन न स्यादनुमितिस्तदा॥२

ह्निमानिति ज्ञानं जायते सैवानुमितिः॥ अत्र प्राचीनाः। व्याप्यत्वेन ज्ञायमानं धूमादिकं लिङ्गमनुमितिकरणमित्याहुः। तद्दू
षयति। ज्ञायमानमिति। लिङ्गस्यानुमित्यकरणत्वे युक्तिमाह॥ अनागतेति। यद्यनुमितौ लिङ्गं करणं स्यात्तदा अनागते विनष्टे च लि व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ३॥
ङ्गेनानुमितिर्न स्यात्। अनुमितिकरणस्य लिङ्गस्य तदानीमभावात्॥ व्याप्यस्येति॥ व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्याव
गाहि ज्ञानमनुमितिजनकं॥ तत्र द्विविधं व्याप्यः पक्षे इति ज्ञानं पक्षो व्याप्यवानिति ज्ञानं वा। अनुमितिस्तु पक्षे व्यापक इति ज्ञानात् प
क्षे साध्यमित्याकारिका॥ पक्षो व्याप्यवानिति ज्ञानात् पक्षः साध्यवानित्याकारिका। द्विविधादपि परामर्शात् पक्षः साध्यवानित्येवानुमितिरि
वन्हिरिह त्यन्ये। ननु व्याप्यधूमवान् पर्वत इति ज्ञानं विनापि पर्वतो धूमवानिति प्रत्यक्षे ततः धूमो वह्निव्याप्य इति स्मरणे भवति तत्रापि नह
यदेवानुमितेर्दर्शनात् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं सर्वत्र कारणं। किन्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन
कारणत्वमावश्यकत्वात् विशिष्टज्ञानकल्पने गौरवात् इति चेन्न॥ व्याप्यतावच्छेदकज्ञानेपि वह्निव्याप्यत्वानिर्णये तज्ज्ञानादनुमित्यु
त्पत्तेः॥ तथा च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वं। किञ्च धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तिः॥ व्याप्यताव
च्छेदकीभूतधूमत्वप्रकारकपक्षधर्मताज्ञानस्य सत्वात्। न च गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वं।

धर्म२ कें

सि·मु·ग·प्रकार· च्यं। यत्र तस्य व्याप्तिज्ञानमेतस्य पक्षधर्मताज्ञानान्नानुमितिः स्यात्। यदि तु लघुरूपीयं तल्लघुव्याप्यतावच्छेदकप्रकारकं पक्षधर्मता तन्मुरूपीय१
ज्ञानं तल्लघुरूपीयानुमितौ हेतुरुच्यते। तदा अनंतकार्यकारणभावः। मन्मते तु समवायसंबंधेन व्याप्तिप्रकारकं पक्षधर्मताज्ञानं समवा
२२ येनानुमितिं जनयतीत्यर्थे नानंतकार्यकारणभावः। यदि तु व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानं च स्वतंत्रं कारणमित्युच्यते। त
दा कार्यकारणभावद्वयं। वह्निव्याप्यो धूम आलोकवान् पर्वत इति ज्ञानादप्यनुमितिः स्यादिति। इष्टं च यत्र ज्ञानद्वयं तत्रापि वि
शिष्टज्ञानं कल्प्यत इति। फलमुखगौरवस्यादोषत्वादिति। व्याप्यो नाम व्याप्त्याश्रयः। तत्र केयं व्याप्तिरित्यत आह।। व्याप्ति
रिति।। वह्निमान् धूमादित्यादौ साध्यं वह्निः साध्यवान् महानसादिः। तदन्यो जलह्रदादिः। तद्वृत्तित्वं धूमस्येति लक्षणसमन्व श्रीशिव
यः। धूमवान् वह्नेरित्यादौ साध्यवदन्यस्मिन्नयःपिंडादौ वह्नेः सत्त्वान्नातिव्याप्तिः। अत्र येन संबंधेन साध्यं तेन संबंधेन साध्य
वान् बोध्यः। अन्यथा समवायसंबंधेन वह्निमान् वह्न्यवयवस्तदन्यो महानसादिस्तत्र धूमस्य वृत्तित्वादव्याप्तिप्रसं २३
ध्य२ गात्।। साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः। तेन यत्किंचिद्वह्निमतो महानसाद्भिन्नेप
र्वतादौ धूमस्य सत्त्वेपि न क्षतिः। येन संबंधेन हेतुता तेन संबंधेन साध्यवदन्यावृत्तित्वं बोध्यं। तेन समवायेन

।।५।। व्याप्तिः साध्यवदन्यस्मिन्नसंबंध उदाहृतः।।५।। धूम२

बे

९ अथवा हेतुमन्निष्ठविरहाप्रतियोगिना। साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते।।६।। ९

त३

धूमावयवे धूमस्य समवायसंबंधेन सत्त्वेपि न क्षतिः। साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिता
काभावः। तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यस्मिन् ह्रदादौ वह्नेर्वृत्तित्वाभावेपि नातिव्याप्तिः।। अत्र यद्यपि द्रव्यं गुणकर्मान्य
त्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात् साध्यवदन्यस्मिन् गुणादौ वृत्तित्वं नास्ति तथापि हेतुतावच्छे
दकरूपेणावृत्तित्वं वाच्यं।। हेतुतावच्छेदकं यद्रूपं तदवच्छिन्नं किंचिदिति फलितोर्थः।। ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये सा
ध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः।। किं च सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसंबंधे
न समवायेन वृत्तेरप्रसिद्धेरित्यत आह। अथवेति।। हेतुमन्निष्ठेति। साध्येनेति। हेतुमति निष्ठा वृत्तिर्यस्य स तथा विरहो
ऽभावः। तथा च हेत्वधिकरणवृत्तिर्योऽभावस्तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिः।। अत्र वह्नि यद्यपि
मान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वस्य तद्वह्न्यादेरस्तीत्यव्याप्तिः। न च समानाधिकर
णवह्निधूमयोरेव व्याप्तिरिति वाच्यं। तद्वह्नेरप्युभयाभाववत्त्वादेकसत्त्वेपि द्वयं नास्तीति प्रतीतेः।। गुणवान् द्रव्य
त्वादित्यादावव्याप्तिश्च।। तथापि साध्यतावच्छेदकं प्रतियोगितानवच्छेदकं तदवच्छिन्नं साध्यसामानाधिक

१=।। हेतुसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकीभूतावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः।।=१

१ यत्साध्यतावच्छेदकं तद९

सि०मु०न०प्र० ण्यमितिवाच्यं॥ ननु रूपत्वव्याप्यजातिमद्वान् पृथिवीत्वादित्यत्र साध्यतावच्छेदका रूपत्वव्याप्या जातयस्तासां
च शुक्लत्वादिरूपाणां नीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति चेन्न॥ तत्र परंपरया रूप
त्वव्याप्यजातिमत्त्वस्यैव साध्यतावच्छेदकत्वात्॥ न हि तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्यामस्ति। रूपत्वव्या
२४ प्यजातिमान्नास्तीति बुद्ध्यापत्तेः॥ साध्याभिन्नेदं व्याप्तेर्भेदात् तादृशस्य च साध्यतावच्छेदकतावच्छेदकप्रतियो
गितावच्छेदकतानवच्छेदकत्वलक्षणघटकमित्यपि वदन्ति। ईदृशं वह्निसंयोगादित्यत्र द्रव्यादौ साध्ये परंपरासंबंधे
उत्वादिकमेव साध्यतावच्छेदकमतो नाव्याप्तिः॥ साध्यतावच्छेदकतावच्छेदकप्रतियोगितावच्छेदकतानवच्छेदकनि श्रीशिव
तिवाच्यं। रूपत्वव्याप्यजातित्वं साध्यतावच्छेदकतावच्छेदकं। शुक्लत्वादिकं तु प्रतियोगितावच्छेदकतावच्छेदकमिति
भेदः॥ हेत्वधिकरणं च हेतुतावच्छेदकविशिष्टाधिकरणं बोध्यं। तेन द्रव्यगुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ शुद्धसत्ता २४
धिकरणगुणादिनिष्ठाभावप्रतियोगित्वेपि द्रव्यत्वस्य नाव्याप्तिः॥ हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं बोध्यं। तेन समवायसंबं
धेन धूमाधिकरणान्तरवयवे निष्ठाभावप्रतियोगित्वेपि वह्नेर्नाव्याप्तिः॥ अभावश्च प्रतियोगिव्यधिकरणो बोध्यः॥

यदि २ तदापुनः २ वृत्ति ४

तेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन तद्वृक्षवृत्तिकपिसंयोगाभावस्य प्रतियोगित्वेपि संयोगस्य नाव्याप्ति
नम्प्रतियोगिव्यधिकरणत्वं च प्रतियोग्यनधिकरणवृत्तित्वं तथैवाव्याप्तिः प्रतियोगिनः कपिसंयोगस्यानधिक
रणगुणादौ वर्त्तते या भावस्तस्यैव वृक्षे मूलावच्छेदेन सत्त्वात्॥ यदि प्रतियोग्यधिकरणावृत्तित्वं तदा संयोगी सत्त्वा
भावः दौ अतिव्याप्तिः॥ सत्ताधिकरणे गुणादौ यः संयोगाभावस्तस्यैव प्रतियोग्यधिकरणद्रव्ये वृत्तेरिति वाच्यं॥ हेत्वधिकरणप्र वं५
तियोग्यनधिकरणवृत्तित्वविशिष्टस्य अभावस्य विवक्षितत्वात्। स्वप्रतियोग्यनधिकरणीभूतहेत्वधिक
रणवृत्त्यभाव इति संनिकर्षः॥ प्रतियोग्यनधिकरणत्वं च प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं बो
ध्यं। तेन विशिष्टसत्तावान् जातेरित्यादौ जात्यधिकरणगुणादौ विशिष्टसत्ताभावप्रतियोगिसत्ताधिकर
णघटादेर्विषयतया ज्ञानस्य द्रव्यवृत्तित्वेपि न क्षतिः॥ इह च वह्निमान् धूमादित्यादौ धूमाधिकरणे समवायेन वह्नि
विरहसत्त्वेपि नाव्याप्तिः॥ ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचिदनधिकरणत्वं तत्सामान्यस्य
वा। यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं विवक्षितं॥ आद्ये कपिसंयोगी एतद्वृक्षत्वादित्य
+ ३ त्रैव न क्षतिः॥ अन्त्ये च साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वं बोध्यं। तेन ज्ञानवान् सत्त्वादित्यादौ सत्ताधिकरण ३

अव्याप्तिः॥ कपिसंयोगाभावस्य हि प्रतियोगितावच्छेदकावच्छिन्नो वृक्षादिनिरपि संयोगो भवति तदनधिकरणं च वृक्ष इति॥ द्वि-
तीये तु॥ प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः॥ सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमाना-
धिकरणत्वात्॥ न च वह्निमान् धूमादित्यादौ घटाभावादेः पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वे
यद्यपि पर्वतादिः स्यात् तथापि साध्यतावच्छेदकसंबंधेन तत्प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणाभा-
वाप्रसिद्धिरिति वाच्यं॥ घटाभावे यो वन्ह्यभावस्तस्य घटाभावात्मकतया घटाभावस्य वन्हेरपि प्रतियोगितदधिक-
रणं च पर्वतादिरिति क्रमेण प्रतियोगिव्यधिकरणत्वस्याप्रसिद्धत्वात्॥ यद्यपि घटाभावादेर्वह्न्यभावादिभिन्नत्वमुच्य-
ते॥ तथापि धूमाभाववान् वह्न्यभावादित्यादौ अव्याप्तिः॥ तत्र साध्यतावच्छेदकसंबंधः स्वरूपसंबंधः तेन संबंधेन च स- श्रीशिव०
र्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वात्॥ हेत्वधिकरणस्येति। तृतीये तु। कपिसंयो- २५
गाभाववानात्मत्वादित्यादावव्याप्तिः। तत्रात्मवृत्तिः कपिसंयोगाभावाभावः कपिसंयोगस्तस्य प्रतियोगितावच्छेदकं गु-
णसामान्याभावत्वमपि तदवच्छिन्नानधिकरणत्वं च हेत्वधिकरणस्यात्मन इति॥ मैवं॥ यादृशप्रतियोगितावच्छेदका-

वच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानाश्रयत्वस्य विवक्षितत्वात्॥ ननु कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगि-
व्यधिकरणाभावाप्रसिद्धिः॥ हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामेवाभावानां साध्यतावच्छेदकसंबंधेन का-
लिकविशेषणतया प्रतियोग्यधिकरणत्वात्॥ अत्र केचित्॥ महाकालभेदविशिष्टघटाभावस्तत्र प्रतियोगिव्यधिकरणः॥
महाकालस्य घटाधारत्वेपि महाकालभेदविशिष्टघटानाधारत्वात्॥ महाकाले महाकालभेदाभावात्। वस्तुतस्तु॥ प्रतियोगितावच्छेद-
कसंबंधेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्व-
उभयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यं। व्यापकसामानाधिकरण्यं व्याप्तिः॥ इत्थं च कालो घट-
वान् कालपरिमाणादित्यादौ संयोगेन संबंधेन घटाभावप्रतियोगिनो घटस्यानधिकरणे हेत्वधिकरणे महाकाले वर्त-
मानः स एव संयोगेन घटाभावस्तस्य प्रतियोगितायाः कालिकसंबंधावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावस-
त्त्वान्नाव्याप्तिः॥ ननु प्रमेयवन्हिमान् धूमादित्यादौ प्रमेयवन्हित्वावच्छिन्नमप्रसिद्धं गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न
कंबुग्रीवादिमान्नास्तीति प्रतीत्या कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताविषयीकरणेन गुरुधर्मस्याप्यनवच्छेदकत्वस्वीकारा-

सि॰मु॰ न॰ प्रकरण॰ तिसंक्षेपः॥ पक्षवृत्तित्वमित्यत्र पक्षत्वं किं तदाह॥ सिषाधयिषेति॥ सपक्षेति॥ सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता॥ तद्धा
न्यक्षसहत्वर्थः॥ सिषाधयिषामात्रं न पक्षता॥ विनापि सिषाधयिषां घनगर्जितेन मेघानुमानात्॥ अत एव साध्यसंदेहोऽपि न
पक्षता॥ विनापि संदेहं घनगर्जितेन तदनुमानात्॥ सिद्धौ सत्यामपि सिषाधयिषासत्त्वे अनुमितिर्भवत्येवातः सिषाधयिषा
२६ विरहविशिष्टत्वं सिद्धौ विशेषणं॥ तथा च यत्र सिद्धिर्नास्ति तत्र सिषाधयिषायां सत्यां असत्यामपि पक्षता॥ यत्र सिषा
धयिषास्ति तत्र सिद्धौ सत्यामसत्यामपि पक्षता॥ यत्र तु सिद्धिरस्ति सिषाधयिषा च नास्ति तत्र न पक्षता॥ सिषाधयिषावि
रहविशिष्टसिद्धेः सत्त्वात्॥ ननु यत्र परामर्शानंतरं सिद्धिस्ततः सिषाधयिषा तत्र सिषाधयिषाकाले परामर्शाभावान्नानुमितिः मर्शा ५
यत्र सिद्धिपरामर्शसिषाधयिषाः क्रमेण भवंति तत्र सिषाधयिषाकाले सिद्धेर्नाशात् प्रतिबंधकाभावादेवानुमितिः श्रीशिव
यत्र सिषाधयिषा सिद्धिपरामर्शास्तत्र परामर्शकाले सिषाधयिषैव नास्ति॥ एवं अन्यत्रापि सिद्धिकाले परामर्शकाले च न सिषा २६
धयिषा योग्यविभुविशेषगुणानां योगपद्यनिषेधात् कथं सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न॥
यत्र वह्निव्याप्यधूमवान्पर्वतो वह्निमानिति प्रत्यक्षं स्मरणं वा ततः सिषाधयिषा तत्र पक्षतासंपत्तये तद्विशेषणावश्यक

त्वादि॥ अत्रेदं बोध्यं॥ यादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वेपि यल्लिंगकानुमितिस्तादृशसिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तल्लिंग
कानुमितौ पक्षता॥ तेन सिद्धिपरामर्शसत्त्वेपि किंचिज्ज्ञानं जायतामितीच्छायामपि नानुमितिर्वह्निव्याप्यधूमवान्पर्वतो वह्निमानिति
प्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छायां तु अनुमितिर्भवत्येव॥ एवं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनुया
मितीच्छायामपि नानुमितिः॥ सिषाधयिषाविरहकाले यादृशसिद्धिसत्त्वे नानुमितिस्तादृशी सिद्धिर्विशिष्य तदनुमितौ प्रतिबंधि सि
का वक्तव्या॥ तेन पर्वतस्तेजस्वी पाषाणमयो वह्निमानिति ज्ञानसत्त्वेप्यनुमितेर्न विरोधः॥ परं तु पक्षतावच्छेदकसामानाधिकरण्ये
न साध्यसिद्धावपि तदवच्छेदेनानुमितिर्दर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन सिद्धिरेव प्रतिबंधिका॥
पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं तु विरोधि॥ इदं तु बोध्यं॥ यत्रायं पुरुषो न वेति संशयानंतरं पुरुषत्वव्या
प्यकरादिमानिति ज्ञानं तत्रासत्यामनुमितीच्छायां पुरुषत्वस्य प्रत्यक्षं भवति न त्वनुमितिरतोऽनुमित्साविरहविशिष्टसमा
नविषयकप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत् स्वातंत्र्येण प्रतिबंधिका॥ एवं परामर्शानंतरं विना प्रत्यक्षेच्छां पक्षादिप्रत्यक्षा
नुत्पत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषये प्रतिबंधिका॥ संक्षेपः॥ प्रसंगात् हेत्वाभासो निरूप्यते॥ अनेक

सि॰मु॰प्रकरण॰ तौ विरुद्धश्च व्याप्यासिद्धः प्रतिपक्षितः ॥ कालात्ययापदिष्टश्च हेत्वाभासास्तु पंचधा ॥ ७१ ॥ आद्यः साधारणस्तु स्यादसाधा
रणकोऽपरः ॥ तथैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत् ॥ ७२ ॥ तल्लक्षणं च यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वं तद्धे
त्वाभासत्वं ॥ तथा हि ॥ व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्ते दोषाः ॥ तद्विषयकत्वं च यादृशविशिष्टवि
२८ षयकत्वेन बोध्यं ॥ तेन बाधभ्रमस्यानुमितिविरोधित्वेऽपि तत्र पर्वतो वह्न्यभाववान् इति विशिष्टस्याप्रसिद्धत्वान्न हेतुदो
षः ॥ न च पर्वतो वह्न्यभावव्याप्यपाषाणमयत्वानिति परामर्शकाले वह्निव्याप्यधूमस्य नासत्वं न स्यात् ॥ तत्र वह्न्य
विशिष्टस्याप्रसिद्धत्वादिति वाच्यं ॥ इष्टापत्तेः ॥ अन्यथा बाधभ्रमस्यापि दोषत्वापत्तेः ॥ तस्मात्तत्र वह्न्यभावव्याप्य
पाषाणमयत्ववानिति । परामर्शकाले वह्निव्याप्यधूमस्य नाभासत्वं भ्रमादनुमितिप्रतिबंधमात्रं । हेतुस्तु न दुष्टः ॥ इत्थं च सा
ध्याभाववद्वृत्तिहेत्वादिकं दोषः तद्वत्त्वं च हेतौ येन केनापि संबंधेनेति न व्याः ॥ परे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरो
धित्वं तत्त्वं हेत्वाभासत्वं ॥ सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा ॥ तद्वत्त्वं हेतौ ज्ञानरूपसंबंधेन । न चैवं वह्निमान् धूमादि
त्यादौ पक्षे साध्याभावविषयकत्वेनानुमितिविरोधित्वात् ज्ञानरूपसंबंधेन तद्वत्त्वस्यापि सत्त्वाद्धेतावपि बाधितत्वापत्ति
रिति वाच्यं ॥ तत्र ज्ञानस्य संबंधत्वाकल्पनात् ॥ अत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात् तत्र बाधितव्यवहा

भावव्याप् ... सिद्ध इति ५

राभावादित्याहुः ॥ अनुमितिविरोधित्वं चानुमितितत्कारणज्ञानान्यतरविरोधित्वं तेन व्यभिचारिणि नाव्याप्तिः ॥ दोषज्ञानं तु यद्धेतुविषयकं
तद्धेतुकानुमितौ प्रतिबंधकं तेनैकहेतौ व्यभिचारज्ञाने हेत्वंतरेणानुमित्युत्पत्तेः ॥ तदभावानवगाहित्वाच्च व्यभिचारज्ञानस्यानुमितिविरो
धित्वं नापि नक्षतिरिति संक्षेपः ॥ तादृशासाध्यपक्षहेतोर्यावंतो दोषास्तावदन्यान्यत्वमत्वं तत्तद्धेत्वाभासत्वं पंचत्वकथनं तु तत्सत्तेनमस्वच्छन्दानु
भिप्रायेण ॥ एवं साधारणान्यतमत्वं अनैकान्तिकत्वं ॥ आद्येति ॥ साधारणः साध्यवदन्यवृत्तिः ॥ तेन च व्याप्तिज्ञानप्रतिबंधः क्रियते ॥
असाधारणः साध्यासामानाधिकरणो हेतुः यथा शब्दो नित्यः शब्दत्वात् ॥ तेन साध्यसाध्यसामानाधिकरण्यग्रहः प्रतिबध्यते ॥ अन्ये
तु सपक्षवृत्तिरसाधारणः सपक्षश्च निश्चितसाध्यवान् इत्थं च शब्दो नित्यः शब्दत्वादित्यादौ पक्षे साध्यनिश्चयस्तदानासाधारण्यं तत्र हे
सर्वमनित्यं प्रमेयत्वात् ५ तोर्निश्चयादित्याहुः ॥ अनुपसंहारी चात्यंताभावाप्रतियोगिसाध्यकादिरित्यादिः ॥ अनेन व्यतिरेकव्याप्तिनिश्चयः प्रतिबंधः क्रियते ॥
४ शब्दोनित्यः कृतकत्वात् ४ विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी ॥ अयं च साध्याभावग्रहसामग्रीत्वेन प्रतिबंधकः ॥ सत्प्रतिपक्षस्तु प्रतिहेतुः साध्याभा
वसाधकः ॥ अत्र तु हेतुरेकोऽविशेषः ॥ साध्याभावसाधकत्वसाध्यसाधकत्वेनोपस्थितयोस्तद्रूपेण विरोधो नायकत्वाविशेषः ॥ सत्प्र
तिपक्षः साध्याभावव्याप्यवान् पक्षः ॥ अगृहीताप्रामाण्यकसाध्यव्यापकत्वेनोपस्थितिकालीनतदभावव्याप्यत्वेनोपस्थि
तिविषयः सहेत्वन्ये ॥ अत्र च परस्परसाभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबंधकः फलं ॥ अत्र केचित ॥ यथाध

१ पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पाषाणमयत्वात् १

सिं॰द्री॰मुक्तावली॰प्र॰ त्वाभावव्याप्यवत्ताज्ञाने विद्यमानेपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते तथा सत्य विपरीतत्वाभावाद्व्याप्यशंखवत्ताज्ञाने स
तिपित्तादिदोषे पीतशंखइति धीर्जायते॥ एवं द्वयव्याप्यदर्शनेपि कोटिद्वयस्य प्रत्यक्षरूपः संशयो भवति॥ तथा सत्प्रतिपक्षस्थले
संशयरूपानुमितिर्भवत्येव॥ यत्र चैककोटिव्याप्यकोटिव्याप्यदर्शनं तत्राधिकबलेनैकद्वितीयकोटिभानप्रतिबंधान्न संशयः॥ फलबलेन
२८ चाधिकसमबलभावः कल्प्यत इत्याहुः॥ तन्न॥ तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेष्यशाब्दबोधादेरलौकिकसन्नि
कर्षाजन्यदोषाविशेषजन्यज्ञानमात्रे तस्य प्रतिबंधकत्वात् लाघवात्। तदुपनीतभानविशेषे शाब्दबोधे च पृथक्प्रतिबंधकतागौ
रवात्॥ तथा च प्रतिबंधकसत्त्वात्कथं अनुमितिः॥ न हि लौकिकसन्निकर्षस्थलेतरस्थले सत्प्रतिपक्षस्थले संशयानुमितिः प्रामाणि इव ६
की॥ येनानुमितिभिन्नत्वेनापि विशेषणीयं॥ यत्र चैककोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञानात्संशयो नान्यथा॥
ग्रहीतप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबंधकत्वादिति॥ असिद्धिरुक्ता आश्रयासिद्ध्याद्यन्यतमत्वं असिद्धित्वं॥ आश्रया श्रीशिव
सिद्धिः पक्षे पक्षतावच्छेदकस्याभावः। यत्र कांचनमयः पर्वतो वन्हिमानिति ज्ञाने विद्यमाने कांचनमयपर्वते परामर्शः प्रति २८
बंधः फलं॥ स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः॥ अत्र च ह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभा
वे ज्ञाते पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबंधः फलं॥ साध्याप्रसिद्ध्यादयस्तु व्याप्यत्वासिद्धिः॥ साध्ये सा

ध्यतावच्छेदकस्याभावः साध्याप्रसिद्धिः॥ एतज्ज्ञाने तु कांचनमयवन्हिमानित्यादौ साध्यतावच्छेदकविशिष्टसाध्यपरामर्शः प्रतिबं
धः फलं। एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः॥ यथा कांचनमयधूमादित्यादौ अत्र च हेतुतावच्छेदकविशिष्टहेतोर्ज्ञानाभा
वात् हेतुकस्य व्याप्तिज्ञानादेरभावः फलं॥ एवं वन्हिमान् नीलधूमादित्यादौ गुरुतया नीलधूमत्वस्य हेतुतानवच्छेदकत्वमपि व्याप्यत्वा
= त्वपिवदंतिपाठः॰४॰ सिद्धिरित्याहुः॥ बाधस्तु पक्षे साध्याभावादि। एतस्याश्चानुमितिप्रतिबंधः फलं॥ न तु निश्चयात्मकतदभावनिश्चयो लौकिकसन्निकर्षाजन्यदो
र्भि षाविशेषजन्यतादृशं तज्ज्ञानमात्रे विरोधि॥ न च संशयसाधारण्यं॥ पक्षे साध्यसंदेह एव ज्ञानमनुमितिकारणं। तद्विरोधित्वाच्च
बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति तु युक्तमिति वाच्यं। अप्रसिद्धसाध्यकानुमित्यनापत्तेः॥ साध्यसंशयादिकं विनाप्यनुमितेस्सु
सर्वसिद्धत्वात्॥ एवं साध्याभावप्रमात्वज्ञानमपि न प्रतिबंधकं। प्रमाणाभावात् गौरवाच्च। अन्यथा सत्प्रतिपक्षादावपि तदभावव्याप्य
ज्ञानप्रमात्वविषयकत्वेन प्रतिबंधकतापत्तेः॥ किंतु भ्रमत्वज्ञानानास्कंदितबाधबुद्धेः प्रतिबंधकता॥ तत्र भ्रमत्वशंकाविघटनेन प्रा
माण्यज्ञानं क्वचिदुपयुज्यते। न च बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः। पक्षे हेत्वभावे स्वरूपासिद्धिरेव दोष इति वाच्यं॥ बाधज्ञानस्य
व्यभिचारज्ञानादेर्भेदात्॥ किंच यत्र परामर्शानंतरं बाधबुद्धिस्तत्र व्यभिचारज्ञानादेराकिंचित्करत्वाद्बाधस्यानुमितिप्रतिबंधक
त्वं वाच्यं॥ न च पक्षे घटे गंधसत्त्वात्कथं बाध इति वाच्यं। पक्षतावच्छेदकदेशकालावच्छेदेन अनुमितेरनुभवसिद्धत्वादिति॥
॥१९॥ एवं यत्रोत्पत्तिक्षणावच्छिन्नघटादौ गंधव्याप्यपृथिवीत्ववत्ताज्ञानं तत्र बाधस्यैव प्रतिबंधकत्वं वाच्यं॥ २

सि॰ मु॰ व॰ प्रकरण॰ सत्प्रतिपक्षतद्व्याप्यभिन्नत्वे हेत्वाभासास्तद्व्याप्या अपि तन्मध्य एवांतर्भवंति॥ अन्यथा हेत्वाभासाधिक्यप्रसंगात्॥ ...व्याप्य
सत्प्रतिपक्षभिन्न एव स्वतंत्रेच्छेन मुनिना पृथगुपदेशात्॥ सत्प्रतिपक्षव्याप्यस्तु न प्रतिबंधक इति प्रघट्टकार्थः॥ यः सपक्षे विपक्षे चेति॥
सपक्षविपक्षवृत्तिः साधारण इत्यर्थः॥ सपक्षः साध्यवान्॥ विपक्षः साध्यवद्भिन्नः॥ विरुद्धवारणाय सपक्षवृत्तित्वमुक्तं॥ अस्तु नाम विपक्षवृ
२१ त्तित्वमेव वाच्यं॥ विरुद्धस्य साधारणत्वेपि दूषकताबीजस्य भिन्नतया तस्य पार्थक्यात्॥ यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः॥
सपक्षविपक्षव्यावृत्त इत्यर्थः॥ सपक्षः साध्यवत्तया निश्चितः। विपक्षः साध्यशून्यतया निश्चितः। शब्दो नित्यः शब्दत्वादित्यादौ यदा
शब्देऽनित्यत्वसंदेहस्तदा सपक्षत्वं घटादीनामेव तद्व्यावृत्तं च शब्दत्वमिति तदा तदसाधारण्यं॥ यदा तु शब्देऽनित्यत्वनिश्चयस्तदा
नासाधारण्यं॥ इदं च प्राचां मते॥ नवीनमतं प्रदर्शयन्नाह॥ तथैवेति॥ सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वस्यैव पक्षत्वात्॥ सामानाधि श्रीशिव
करण्यग्रहस्थलांतराभावान्नानुमितिः॥ इदं तु न सम्यक्॥ पक्षैकदेशे सहचारग्रहेपि क्षतेरभावात्॥ अस्तु वा सहचारग्रहस्तथापि
तानरूपसिद्धेरेव नतु तावता हेत्वाभासत्वं तस्य॥ तथापि केवलान्वयिसाध्यकत्वं तथात्वमित्युक्तं॥ यः साध्यवतीति॥ एवका २२
रेण साध्यवत्तावच्छेदेन हेत्वभावो बोधितः॥ तथा च साध्यव्यापकीभूताभावप्रतियोगित्वं तदर्थः॥ आसिद्धिभेदानाह॥ आ
श्रयासिद्ध्याद्येति॥ व्याप्यत्वासिद्धिरपरेति॥ पक्षासिद्धिरिति॥ ह्रदो द्रव्यमिति॥ व्याप्यत्वासिद्धिरपरेति॥ पक्षासिद्धिः आश्रयासिद्धिरित्य

र्थः॥ अपरा स्वरूपासिद्धिरित्यर्थः॥ नीलधूमेति॥ नीलधूमत्वं गुरुतया न हेतुतावच्छेदकं॥ समानाधिकरणव्याप्यतावच्छेदकधर्मा
न्तराघटितस्यैव व्याप्यतावच्छेदकत्वात्॥ प्रत्यक्षप्रागभावत्वसंग्रहाय समानाधिकरणेति॥ विरुद्धयोः परामर्शेति॥ कपिसंयोगतदभा
वव्याप्यवत्तापरामर्शेन सत्प्रतिपक्षत्वं अत उक्तं विरुद्धयोरिति॥ स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्श
विषय इत्यर्थः॥ साध्यशून्यो यत्र पक्ष इति॥ उत्पत्तिकालीनघटे इति॥ पक्षः पक्षतावच्छेदकविशिष्ट इत्यर्थः॥ तेन घटे गंधसत्वेपि न क्षतिः॥ एवं
मूलावच्छिन्नो वृक्षः कपिसंयोगी इत्यत्रापि बोध्यं॥ ॥इत्यनुमानं समाप्तं॥ ॥ग्रामीणस्येति॥ सादृश्यधीरि
ति॥ वाक्यार्थस्येति॥ गवयादिपदानां त्विति॥ यत्रारण्यकेन चित् ग्रामीणाय प्रोक्तं॥ गोसदृशो गवयपदवाच्य इति॥ पश्चाद्ग्रामीणेन
क्वचिदरण्यादौ गवये दृष्टस्तत्र गोसादृश्यज्ञानं यज्जातं तदुपमितिकरणं॥ तदनंतरं गोसदृशो गवयपदवाच्य इति अतिदेशवाक्यार्थ
स्मरणं जायते तद्व्यापारः॥ तदनंतरं तत्र गवयो गवयपदवाच्य इति यज्ज्ञानं जायते तदुपमितिः॥ न त्वयं गवयपदवाच्य इ
त्युपमितिः॥ गवयांतरे शक्तिग्रहाभावप्रसंगात्॥ ॥इत्युपमानं समाप्तं॥ ॥शाब्दबोधप्रकारं दर्शयति॥ ॥
पदज्ञानं त्विति॥ शाब्दबोधे इति॥ लक्षणा शक्यसंबंध इति॥ ननु शाब्दज्ञाने पदं करणं॥ पदाभावेपि मौनिश्लोकादौ शाब्दबोधात्॥ पदज्ञा
पदार्थस्मरणं व्यापारः॥ अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः॥ तत्रापि वृत्त्या पदजन्यत्वं वो

पदार्थस्यसंबंधः ३

सि॰मु॰श॰प्रकरण॰ अन्यथा घटपदात्समवायसंबंधेनाकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः॥ वृत्तिश्च शक्तिलक्षणान्यतरसंबंधः॥
अतएव शक्तिलक्षणान्यतरस्योपयोगः। पूर्वं शक्तिग्रहाभावे पदस्य नेपित संबंधेन स्मरणानुपपत्तेः। स्मरणं न स्यादिति संबंधिज्ञानाविषयार्थ
स्मारकत्वं बोध्यं। शक्तिश्च पदेन सह [redacted]। सा चास्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा। आधुनिके नाम्नि शक्तिरस्त्येव।
एकादशेऽहनि पिता नाम कुर्यादितीश्वरेच्छायाः सत्वात्। आधुनिकसंकेते तु न शक्तिरिति संप्रदायः। नव्यास्तु। ईश्वरेच्छा न शक्तिः किं
त्विच्छैव। तेन आधुनिकसंकेतेपि शक्तिरस्त्येवेत्याहुः॥ शक्तिग्रहस्तु व्याकरणादितः॥ तथाहि॥ शक्तिग्रहं व्याकरणोपमानकोशाप्त
वाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ शक्तिग्रहेति। वाक्यस्य शेषेति। धातुप्रकृतिप्रत्यया
दीनां शक्तिग्रहो व्याकरणाद्भवति। क्वचित्तु सति बाधके त्यज्यतेति। यथा वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते। चैत्रः पचतीत्या श्रीशिव
दौ कर्त्रा सह चैत्रस्य अभेदान्वयः। तच्च गौरवान्न स्वीक्रियते। किंतु कृतौ लाघवात्। कृतिश्चैत्रादौ प्रकारीभूय भासते। न च कर्तुरनभिधान
स्था त् चैत्रादिपदानंतरं तृतीयादिविभक्तिः। कर्तृसंख्यानभिधानस्य तंत्रत्वात्॥ संख्याभिधानयोग्यस्य कर्तृत्वाद्य ३०
नस्तु प्रथमांतपदोपस्थाप्यः। कर्मत्वादिकस्य विशेषणत्वतात्पर्यविषयत्वमर्थः। तेन चैत्र इव गच्छतीत्यादौ चैत्रसे
स्याप्यन्वयः। यत्र कर्मादीनां विशेषणत्वतात्पर्यं तत्र कारकाय प्रथमांतेति। यद्वा कर्मत्वादिसंख्या तथाविध विशेषण

तं प्रथमार्थः। तेन चैत्र इव गच्छतीत्यत्र चैत्रादेर्द्वारपो। स्तोकं पचतीत्यादौ स्तोकादेर्द्वारणाय द्वितीयं दलं। तस्य द्वितीयांतपदोपस्था
प्यत्वाहारणं। एवं व्यापारेपि न शक्तिः गौरवात्। रथो गच्छतीत्यादौ तु व्यापारे आश्रयत्वे वा लक्षणा। जानातीत्यादौ आश्रयत्वे। नश्य
तीत्यादौ प्रतियोगित्वे निरूढलक्षणा। उपमानादपि यथा शक्तिग्रहस्तथोक्तं। एवं कोशादपि शक्तिग्रहः सति बाधके क्वचित्त्यज्यतेपि।
यथा नीलादिपदानां नीलरूपादौ नीलविशिष्टे च कोशेन शक्तिरुक्ता। तथापि लाघवान्नीलादौ शक्तिर्नीलविशिष्टे तु ल
क्षणा। एवमाप्तवाक्यादपि। यथा कोकिलः पिकपदवाच्य इत्यादिशब्दात् पिकादिशब्दे शक्तिग्रहः। एवं व्यवहारादपि।
यथा प्रयोजकवृद्धेन घटमानयेत्युक्तं तत् श्रुत्वा प्रयोज्यवृद्धेन घट आनीतस्तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमा
नयेति शब्दप्रयोज्यमित्यवधारयति॥ ततश्च घटं नय गामानयेत्यादिवाक्यादावापोद्वापाभ्यां घटादिपदानां का
र्यान्वितघटादौ शक्तिं गृह्णाति। इत्थं च भूतलं नीलो घट इत्यादिशब्दान्न शाब्दबोधः। घटादिपदानां कार्यान्वितघटादि
बोधे सामर्थ्यावधारणात्। कार्यताबोधं प्रति लिङादीनां सामर्थ्यात्तदभावान्न शाब्दबोध इति केचित्। तन्न। प्रथ
मतः कार्यान्वितघटादौ शक्त्यवधारणेपि लाघवेन पश्चात्तस्य परित्यागौचित्यात्। एवं चैत्रपुत्रस्ते जातः कन्या
ते गर्भिणीत्यादौ मुखप्रसादमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन पारिशेष्यात्तच्छाब्दबोधं निर्णीय तद्धेतुक त

सि॰मु॰श॰प्रकर॰

यालघ्नस्य नव धारयति॥ तथा व्यभिचारात् कार्यान्विते शक्तिः॥ न च तत्र तं पश्येत्यादिशब्दांतरमध्याहार्यं मानाभावात्॥ चैत्र पुत्र
स्ते जातो मृतश्चेत्यादौ तदभावात्॥ इत्थं च लाघवादन्विते॥ न च तद्घटेपि शक्तिः स्यात्॥ घटपदस्य घटमात्रे शक्तिग्रहं धारयति॥ यथा
क्यशेषादपि शक्तिग्रहो यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः॥ कंगौ च म्लेच्छानां॥ तत्र य
३९ त्रान्या ओषधयो म्लायंते तत्रैते मोदमाना स्तिष्ठंति॥ वसंते सर्वसस्यानां जायते पत्रशातनं॥ मोदमानाश्च तिष्ठंति यवाः कणि
शशालिनः॥ इति वाक्यशेषाद्दीर्घशूकविशेषे शक्तिर्निर्णीयते। कंगौ तु शक्तिभ्रमात् प्रयोगः॥ नानाशक्तिकल्पने गौरवात्॥ ह
रिपदादौ विनिगमनाभावात् नानाशक्तिकल्पनं॥ एवं विवरणादपि शक्तिग्रहः॥ विवरणं तु तत्समानार्थकपदांतरेण तदर्थक
थनं॥ यथा घटोस्तीत्यस्य कलशोस्तीत्यनेन विवरणे घटपदस्य कलशे शक्तिग्रहः॥ एवं पचतीत्यस्य पाकं करोतीत्यनेन विव ती
रणादाख्यातस्य यत्नार्थकत्वं कल्प्यते। एवं सिद्धपदस्य सान्निध्यादपि शक्तिग्रहः॥ यथा इह सहकारतरौ मधुरं पिको रौति
इत्यादौ पिकपदस्य कोकिले शक्तिग्रह इति। तत्र जातावेव शक्तिर्न तु व्यक्तौ व्यभिचारादानंत्याच्च॥ व्यक्तिं विना जातिमान
स्यासंभवात् व्यक्तेरपि भानमिति केचित्॥ तन्न॥ शक्तिं विना व्यक्तिभानानुपपत्तेः॥ न च व्यक्तौ लक्षणा॥ अनुपपत्तिप्रतिसं नि
धानं विनापि व्यक्तिबोधात्॥ न च व्यक्तिशक्तावानंत्यं॥ सकलव्यक्तीनामेकस्या एव शक्तेः स्वीकारात्॥ न चाननुगमः॥ गोत्वादेरेवानुग ग

दाध्यकी॰१ गमात्॥ किंच गोः शक्या इति शक्तिग्रहो यदि तथा शक्तिः॥ यदि तु गोत्वं शक्यमेकमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं॥ शा
ब्दबोधश्च न स्यात्॥ समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात्॥ किंच गोत्वे यदा शक्तिग्रहस्तदा
गोत्वत्वं शक्यतावच्छेदकं वाच्यं। गोत्वत्वं च गवेतरासमवेतत्वे सति सकलगोसमवेतत्वं। तथा च। गोव्यक्तीनां शक्यतावच्छेद
केऽनुप्रवेशः॥ तथैव गौरवं॥ तस्मात् तत्तज्जात्याकृतिविशिष्टतद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिः जात्याकृतिविशिष्टव्य
क्तौ विश्राम्यतीति॥ शक्तं पदं॥ तच्चतुर्विधं॥ क्वचिद्यौगिकं क्वचिद्रूढं क्वचिद्योगरूढं क्वचिद्यौगिकरूढं॥ तत्रावयवार्थ एव बु
ध्यते तद्यौगिकं॥ यथा पाचकादिपदं॥ यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढं॥ यथा गोपदमंडपादि
पदं च॥ यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढं॥ यथा पंकजादिपदं॥ तथा हि॥ पंकजपदमवयवशक्त्या
पंकजनिकर्तृरूपमर्थं बोधयति॥ समुदायशक्त्या पद्मत्वेन रूपेण पद्मं बोधयति॥ न च केवलावयवशक्त्या कुमुदे प्रयोग
स्यादिति वाच्यं। रूढिज्ञानस्य केवलयौगिकार्थबोधे प्रतिबंधकत्वादिति प्राञ्चः॥ वस्तुतस्तु समुदायशक्त्युपस्थि
तपद्मे अवयवार्थपंकजनिकर्तुरन्वयो भवति सान्निध्यात्॥ यत्र रूढ्यर्थस्य बाधः प्रतिसंधीयते तत्र लक्षणया कुमुदादे
र्बोधः॥ यत्र तु कुमुदत्वेन रूपेण बोधनतात्पर्यज्ञानं तत्र स्वतंत्रावयवशक्तिमात्रेण निर्वाह इत्याहुः॥ यत्र तु स्थ

सि.मु.श.प्रकरण

लपमारादयपदार्थबाधस्तत्रसमुदायशक्त्यापद्मत्वेनरूपेणबोधः॥ यदितुस्थलपंकजंविजानीयमेवलक्षणेति॥ यत्रतुरूढ्यर्थ
यौगिकार्थयोःस्वातंत्र्येणबोधस्तद्यौगिकरूढं॥ यथोद्भिदादिपदं। तत्रऊर्ध्वभेदेनतरुगुल्मादिरपिबुध्यतेयागविशेषश्चेति।
॥लक्षणेति॥ गंगायांघोषइत्यादौगंगापदस्यशक्यार्थेप्रवाहरूपेघोषस्यान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वापद्यतेतिसंधी
यतेतत्रलक्षणयातीरस्यबोधः। साचशक्यसंबंधः। तथाहि। प्रवाहरूपशक्यार्थसंबंधस्यतीरेगृहीतत्वात्तीरस्यस्मर
णं॥ ततःशाब्दबोधः। परंतुयद्यन्वयानुपपत्तिर्लक्षणावीजंस्यात्तदा यष्टीःप्रवेशयेत्यत्रलक्षणानस्यात्॥ यष्टिपुरुषप्रवेशान्वय
स्यानुपपत्तेरभावात्। तेनप्रवेशभोजनतात्पर्यानुपपत्त्यायष्टिधरेषुलक्षणा। एवंकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्य
दध्युपघातकेलक्षणा॥ सर्वतोदधिरक्षायास्तात्पर्यविषयत्वात्। छत्रिणोयांतीत्यादौछत्रिपदस्यैकसार्थवाहित्वे श्रीशिव
लक्षणा। इयमेवाजहत्स्वार्थालक्षणाप्युच्यते॥ एकसार्थवाहित्वेनरूपेणछत्रितदन्ययोर्बोधात्॥ यदित्वन्वयानुपपत्तिर्ल
क्षणावीजंस्यात्तदा क्वचिद्गंगापदस्यतीरेक्वचिद्घोषपदस्यमत्स्यादौलक्षणेतिनियमोनस्यात्। इदंतुबोध्यं। शक्यार्थसंबं
धोयदितीरत्वेनरूपेणगृहीतस्तदातीरत्वेनरूपेणतीरबोधः। यदिगंगातीरत्वेनरूपेणगृहीतस्तदागंगातीरत्वेनरूपेणा
शाब्दबोधः। अतएवलक्ष्यतावच्छेदकेनलक्षणा॥ तत्प्रकारकबोधस्यलक्षणांविनानुपपत्तेः। परंत्वेवंक्रमेणलक्ष्यता
वच्छेदकेविशक्तिर्नस्यात्॥ तत्प्रकारकपदार्थस्मरणस्यासाधारणतत्पदस्यसामर्थ्यादितिध्येयम्। यत्र

तुशक्यार्थस्यपरंपरासंबंधरूपालक्षणा॥ सालक्षितलक्षणेत्युच्यते। यथा। द्विरेफादिपदेरेफद्वयसंबंधोभ्रमरपदेज्ञा। यतेभ्रमरपदस्यचसंबं
धोभ्रमरेज्ञायतेतत्रलक्षितलक्षणा। किंतुलाक्षणिकपदंनानुभावकं। लाक्षणिकार्थस्यशाब्दबोधेतुपदांतरंकारणं। शक्तिलक्षणान्य
तरसंबंधेनतत्पदजन्यत्वस्यशक्यार्थशाब्दबोधेप्रतिपदानांसामर्थ्यात्। तथाकारणात्। वाक्येतुशक्तेरभावात्। शक्यतासंबंधरूपालक्ष
णापिनास्ति। यत्रतुगंभीरायांनद्यांघोषइत्युक्तं तत्रनदीपदस्यनदीतीरेलक्षणा। गंभीरपदार्थस्यनद्यासहाभेदान्वयः। क्वचिदेक
देशान्वयस्यापिस्वीकृतत्वात्। यदितुतन्नैकदेशान्वयोनस्वीक्रियतेतदानदीपदस्यगंभीरनदीतीरेलक्षणा। गंभीरपदंतात्पर्यग्रा
हकं। बहुव्रीहावप्येवं। तत्रहिचित्रगुपदादौयद्येकदेशान्वयःस्वीक्रियतेतदागोपदस्यगोस्वामिनिलक्षणा गविचित्राभेदान्वयः। य
दित्वेकदेशान्वयोनस्वीक्रियतेतदागोपदस्यचित्रगोस्वामिनिलक्षणा। चित्रपदंतात्पर्यग्राहकं। आरूढवानरोवृक्षइत्यत्रवानरपद
स्यवानरारोहणेलक्षणा। आरूढपदंतात्पर्यग्राहकं। एवमन्यत्रापि। तत्पुरुषेतुपूर्वपदेलक्षणा। तथाहि॥ राजपुरुषइत्यादौराजा
दिपदार्थेनपुरुषादिपदार्थस्यसाक्षादन्वयः। निपातातिरिक्तनामार्थयोःसाक्षाद्भेदेनान्वयबोधस्याव्युत्पन्नत्वादित्थंच। राज
पुरुषइत्यादावपितथान्वयबोधस्यात्। घटोनपटइत्यादौघटपटाभ्यांनञःसाक्षादेवान्वयसंनिपातातिरिक्तेति॥ नीलोघटइ
त्यादौनामार्थयोरभेदसंबंधेनान्वयाद्भिन्नेति। नचराजपुरुषइत्यादौतुसमासविभक्तेःस्मरणकल्प्यमितिवाच्यं। अस्तुवै

सि·मु·श·प्रकरण·

भक्तेरपि नलोपो वेदस्यात्॥ तस्माद्राजपदादौ राजसंबंधिनि लक्षणा॥ तत्पुरुषेणासह अभेदान्वयः॥ द्वंद्वे तु। धवखदिरौ छिंदीत्यादौ धवस्यख
दिरस्य च भिन्नत्वेऽर्थे हित्वप्रकारेण बुध्यते तत्र न लक्षणा॥ न च साहित्ये लक्षणेति वाच्यं। साहित्यस्यान्वयबोधेऽपि ह्यदर्शनात्। न च एकक्रि
यान्वयित्वरूपं साहित्यं अस्तीति वाच्यं। क्रियाभेदेऽपि धवखदिरौ पश्य छिंदीत्यादौ तथा दर्शनात्॥ साहित्यस्याननुभवाच्च॥ अतएव राजपु
पुरोहितौ सायुज्यकामौ यजेयातामित्यत्र लक्षणाभावाद्द्वंद्व आश्रीयते॥ तस्मात्साहित्यादिकं नार्थः॥ किंतु वास्तवो भेदबोधो यथमत्र द्वंद्वः।
न च नीलघटयोरभेद इत्यत्र कथमिति वाच्यं। तत्र नीलपदस्य नीलत्वे न घटपदस्य घटत्वे लक्षणा। अभेदस्त्वस्य च आश्रययोर्भेदस्यापि
तौ॥ समाहारद्वंद्वे तु परिसमाहारोऽपि अनुभूयत इति लक्षणा। तत्र अहिनकुलमित्यादौ परपदे अहिनकुलसमाहारे लक्षणा। पूर्वपदं तात्
पर्यग्राहकं। न च भेरीमृदंगवादयेत्यत्र कथं समाहारे वदनकर्मत्वान्वयः तस्याः परावृद्धिविशेषरूपस्य वादनासंभवादिति वाच्यं।
परंपरासंबंधेन तदन्वयात्। एवं पंचमूलीत्यादावपि। परं तु अहिनकुलमित्यादावहिनकुलयोरनुभूयते मत्येकमेकत्वान्वयः समाहा
समाहाराच्च यत्र एकत्वं नपुंसकत्वं च द्वंद्वस्य प्राणितूर्यसेनांगानामित्यादिसूत्रेण प्राप्तं॥ तेनैवान्यत्र एकवचनमस्ति। धीत्वाद्द्वं। पितरौ श्वशुरावित्या

श्रीशिव

ज

दौ पितृपदेन जनकदंपत्योः श्वशुरपदेन स्त्रीजनकदंपत्योर्लक्षणा॥ एवमन्यत्रापि। घटावित्यादौ न लक्षणा। घटत्वेन रूपेण
नानाघटोपस्थितिसंभवात्। कर्मधारयस्थले तु नीलोत्पलमित्यादौ अभेदसंबंधेन नीलपदार्थ उत्पलपदार्थे प्रका

रस्तत्र न लक्षणा। अतएव निषादस्थपतिं याजयेदित्यत्र न तत्पुरुषो लक्षणापत्तेः। किंतु कर्मधारये लक्षणाया अभावात्। न च निषादस्य
संकरजातीयस्य वेदानधिकाराद्याजनासंभव इति वाच्यं। निषादस्य विद्याप्रयुक्तेस्तत्कल्पनीयत्वात्। लाघवेन मुख्यार्थस्यान्वयेत
दनुपपत्त्या कल्पनाया फलमुखगौरवतया अदोषत्वादिति। भुपकुंभे अर्धपिप्पलीत्यादौ परपदे तत्संबंधेन लक्षणा॥ पूर्वपदार्थप्रधा
नतया चान्वयबाध इति। इत्थं च समासेन क्वापि शक्तिः। पदशक्त्यैव निर्वाहादिति॥ आसत्तिर्योग्यताकांक्षेति। आसत्तिज्ञानं योग्य
ताज्ञानमाकांक्षाज्ञानं तात्पर्यज्ञानं च शाब्दबोधे कारणं॥ तत्रासत्तिपदार्थमाह। सन्निधानं तु पदस्यासत्तिरुच्यते। यत्पदार्थेन सह यत्पदा
र्थस्यान्वयोऽपेक्षितस्तयोः पदयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणं। तेन गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादौ न शाब्दबोधः।
तात्पर्यगर्भाया आसत्तेः। नीलो घट इत्यादिव्यपदेशस्य आसत्तिभ्रमेण शाब्दभ्रमाभावेऽपि न क्षतिः। ननु यत्र छत्री कुंडली वासस्वी देव
दत्तस्याद्युक्ते तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशादव्यवधानेनोत्तरपदस्मरणासंभव इति चेन्न। प्रत्येकपदानुभ
वजन्यसंस्कारैरव्यवहितमेतावत्पदविषयकस्मरणस्याव्यवधानेनोपपत्तेः॥ नानासन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्का
रैरेकस्मरणोत्पत्तेरपि संभवात्। तावत्पदसंस्कारसहितचरमवर्णज्ञानस्य बोधकत्वात्। कथमन्यथा नानावर्णा
त्मकपदस्मरणं॥ परं तु तावत्पदार्थानां स्मरणं। दैवबलेन कपोतन्यायाज्जावत्पदार्थानां। क्रियाकर्मभावेनान्वयः॥

सि॰मु॰श॰प्रकर॰

३४

पः शाब्दबोधो भवतीति किंचित्॥ धृवाद्युवानः शिरोवकंपनाः स्वलेखमा॥ भ्रीयुगपस्य तेति। तथैवसं वैयुगपत्परार्थः प
दस्परेणान्वयिनो भवंति। परंतु यद्यदाकांक्षितं योग्यं सन्निधानं प्रपद्यते। तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते॥१॥
तथा च खंडवाक्यार्थबोधानंतरं तथैव पदार्थस्मृत्यां सत्यां वाक्यार्थधीस्त्यक्तु॥ एतेनाव्यवधाननियमे महावाक्यार्थस्याबो
ब्दिनिरस्तः। तत्पूर्णसंस्कारचरमवर्णोपलंभेन तद्बुद्धे महावाक्यनैवापपतेरिति। इदं तु बोध्यं। यत्र हारमिलकेत
त्रापि येही स्यात्पदस्य तानन्वयबोधः। ननु पिधानमित्यादि तत्पार्थज्ञानात् परजन्यतत्पदार्थोपस्थितेत शाब्दबो
धे हेतुत्वात्॥ किंच क्रियाकर्मपदानां नैवं नैव सहसाकांक्षितत्वात्तेन क्रियापदं विनाकथं बोधः स्यात्। तथा पु
ष्पेभ्यस्त्वादौ स्पृहयतीति पदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदाध्याहार आवश्यकः॥ योग्यतां निर्वक्ति॥ प श्रीशिव
दार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता॥ एकपदार्थे परपदार्थसंबंधो योग्यतेत्यर्थः। तज्ज्ञानाभावे च वह्निना सि
सिंचतीत्यादौ न शाब्दबोधः। ननु तस्या योग्यताया ज्ञानं शाब्दबोधात्प्राक् सर्वत्र न संभवति। वाक्यार्थस्यापूर्व ३४
त्वादिति चेन्न। तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य क्वचित् निश्चयरूपस्य योग्यताज्ञानस्य संभवात्॥
न्न्यास्ते॥ योग्यताज्ञानं शाब्दबोधकारणं॥ वह्निना सिंचतीत्यादौ सेके वह्निकरणत्वाभावरूपायो

ग्यतानिश्चयेन प्रतिबंधान्न शाब्दबोधः॥ तदभावनिश्चयस्य लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्र
तिबंधकत्वात् शाब्दबोधं प्रत्यपि प्रतिबंधकं सिद्धं। योग्यताज्ञानविलंबात् शाब्दबोधविलंबो असिद्ध इत्याहुः॥ आ
कांक्षां निर्वक्ति॥ तत्परेणेति। आकांक्षा। येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन सह तस्याकांक्षेत्यर्थः॥ क्रियापदं
विना कारकपदं नान्वयबोधं जनयतीति तेन तस्याकांक्षा वस्तुतस्तु क्रियाकारकपदानां संनिधानमासत्तिराच
रितार्थः। परंतु घटकर्मताबोधं प्रति घटपदोत्तरद्वितीयारूपाकांक्षाज्ञानं कारणं। तेन घटः कर्मत्वमानयनं कृतिरित्या
दौ न शाब्दबोधः॥ अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ पुत्रेण सह राजपदस्य तात्पर्यग्रहसत्त्वात्तेनैवान्वयबोधः॥
पुरुषेण सह तात्पर्यग्रहे तु तेन सहान्वयबोधः स्यादेव॥ तात्पर्यं निर्वक्ति॥ वक्तुरिच्छा तु तात्पर्यं परिकीर्तितं॥ यदि ता
त्पर्यज्ञानं कारणं न स्यात्तदा सैंधवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोध इति न स्यात्॥ न च तात्पर्यग्राह
ग्राहकाणां प्रकरणादीनां शाब्दबोधकारणत्वमस्त्विति वाच्यं। तेषामननुगमात्॥ तात्पर्यज्ञानजनकत्वेन तेषामनु
गमे तु तात्पर्यज्ञानमेव लाघवात्कारणमस्तु॥ इत्थं च वेदस्थले तात्पर्यज्ञानार्थमीश्वरः कल्प्यते। न च तत्राध्या

सि·मु·प्र· शाब्दखं० यकतात्पर्यज्ञानंकारकेणमितिवाच्यं॥ सर्गादौ अध्यापकाभावात्॥ न च प्रलय एव नास्ति कुत्र सर्गादिरिति वाच्यं॥ प्रल
यस्यागमप्रतिपाद्यत्वात्॥ इष्टं च शुकवाक्येपि ईश्वरीयतात्पर्यज्ञानं कारणं विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्य
ज्ञानं कारणं। अन्ये तु। नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणं। तथा च शुकवाक्येपि नैव तात्पर्यज्ञानशाब्दबोधः वे
दे तु अनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः॥ पूर्वमनुभवस्मरणभेदाद्द्वैविध्यमुक्तं॥ अ
३५ तत्र अनुभवप्रकारा दर्शिताः। क्रमगतत्या स्मरणं दर्शितं॥ तत्राह पूर्वानुभव इति कारणं॥ अत्र केचित्। अनुभ
वत्वेन न कारणत्वं किंतु ज्ञानत्वेन अन्यथा स्मरणोत्तरं स्मरणं न स्यात्॥ समानप्रकारस्मरणे न पूर्वसंस्कार
स्य विनष्टत्वात्॥ मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुः॥ तन्न॥ यत्र समूहाल श्री शिव
म्बेनानन्तरं घटपटादिक्रमेण स्मरणमजनि तत्र सकलविषयकस्मरणं तु नाभूत्॥ तत्र फलस्य संस्कारनाशक
त्वाभावात्॥ कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यं। तथा च न क्रमिकस्मरणानुपपत्तिः। ३५
न च पुनः पुनः स्मरणात् दृढतरसंस्कारानुपपत्तिः। झटिति उद्बोधकसमवधानस्य दृढपदार्थत्वात्॥ न चावि
निगमनाविरहादेव ज्ञानत्वेनापि जनकत्वं स्यादिति वाच्यं। विशेषधर्मेण व्यभिचाराज्ज्ञानसामान्यधर्मेणा

न्यथासिद्धत्वात्॥ कथमन्यथा दंडस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वं॥ न चोत्तरकालिकस्मरणानां संस्कारनाशकत्वक
ल्पनेन न व्यभिचारसंशयाभावात्॥ इदानीं क्रमप्राप्तं मनो निरूपयितुमाह॥ साक्षात्कारेति॥ एतेन मनसि प्रमाणं
दर्शितं॥ तथा हि॥ सुखसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वात्॥ चाक्षुषसाक्षात्कारवदिति अनुमानेन करणत्वे
मनसः सिद्धं॥ न चैवं दुःखादिसाक्षात्काराणामपि करणान्तराणि स्युरिति वाच्यं॥ लाघवादेकस्यैव सकलसाक्षात्कार
करणतया सिद्धेः॥ एवं सुखादीनामसमवायिकारणसंयोगाश्रयतया मनः सिद्धं बोध्यं॥ मनसो अणुत्वे प्रमाणमा
ह॥ अयौगपद्याज्ज्ञानानां तस्याणुत्वमपीष्यते॥ ज्ञानानां चाक्षुषरासनादीनां अयौगपद्यं एककालोत्पत्तिर्नास्ति स्वरसानुभ
वसिद्धं॥ तत्र नानेन्द्रियाणां सत्त्वेपि विषयसंनिधाने यत्संबंधादेकेन्द्रियेण ज्ञानमुत्पाद्यते॥ यदसंबंधाच्चापरेर्नोत्पाद्यते
तन्मनः॥ विभुत्वे चासन्निधानं न भवतीति न विभुमनः॥ न च तदानीं अदृष्टविशेषोद्बोधविलंबादेव तत्र ज्ञानविलं
ब इति वाच्यं॥ तथा सति चक्षुरादीनामप्यकल्पनापत्तेः॥ न च दीर्घशष्कुलीभक्षणादौ नानावधानसंयोगः कथ
मेकदा नानेन्द्रियजं ज्ञानमिति वाच्यं॥ मनसोतिलाघवात् झटिति नानेन्द्रियस ······ भ्रमाज्ज्ञानोत्पत्त्या उत्पलेश

सि॰मु॰वली॰प्रकर॰ न तत्र मृदादावियौगपद्यप्रसंगस्याभावात्॥ नच मनसः संकोचविकाशशालित्वादुभयोपपत्तिरस्त्विति वाच्यं॥ ना
नावयवतन्नाशकल्पने गौरवात्॥ लाघवान्निरवयवस्यैव मनसः कल्पनादिति संक्षेपः॥ द्रव्यं निरूप्य गुणान्निरूप
यति॥ अथ द्रव्याश्रितेति॥ गुणत्वजातौ किं मानमिति चेदिदं॥ द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किं
चिद्धर्मावच्छेद्या॥ निरवच्छेद्यकारणताया असंभवात्॥ नहि रूपत्वादिकं सत्ता वा तत्रावच्छेदिका॥ न्यूनातिरिक्तदेशवृ
त्तित्वात्॥ अतश्चतुर्विंशत्यनुगतं वाच्यं तदेव गुणत्वमिति॥ यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावतिव्याप्तेः॥ तथा
पि द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः॥ भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं॥ नहूत्वाचगु
णानामिति॥ कर्मत्वं द्रव्यत्वं वा न द्रव्यत्वव्यापकतावच्छेदकं॥ गगनादौ द्रव्ये कर्मणोऽभावात्॥ द्रव्यत्वत्वं सामान्य श्रीशिव
त्वादिकं वा न जातिरिति तद्व्युदासः॥ यद्यपि निर्गुणत्वं कर्मादावपि तथापि सामान्यवत्त्वे कर्मान्यत्वे च सति निर्गुणत्वं
बोध्यं॥ जात्यादीनां न सामान्यवत्त्वं कर्मणो न कर्मान्यत्वं द्रव्यस्य न निर्गुणत्वमिति न तत्रातिव्याप्तिः॥ निष्क्रिया
इति स्वरूपकथनं॥ न तु लक्षणं॥ गगनादावतिव्याप्तेः॥ रूपरसस्पर्शगंधाः परत्वमपरत्वकं॥ द्रवो गुरुत्वस्नेहश्च वेगो मूर्तगु

णा अमी॥ १॥ अमूर्त्तेष्वनवर्त्तन्त इत्यर्थः॥ धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च॥ एतेऽमूर्त्तगुणा इति॥ संख्यादिश्चेति॥ मूर्त्तामूर्त्तगुणा इत्यर्थः॥
मूर्त्तवृत्तिवृत्ति अमूर्त्तवृत्तिवृत्ति गुणत्वव्याप्यजातिमत्त्वं तत्त्वं संख्यात्वादिकमादाय लक्षणसमन्वयः॥ संयोगश्च विभागश्चेति॥ द्वि
पृथक्त्वेति॥ संयोगविभागद्वित्वादीनि द्विवृत्तीनि॥ त्रित्वादिकं तु चेष्टादिकं त्रिचतुरादिवृत्तीति बोध्यं॥ अतः शेषगुणेति॥ रूपरसगं
धस्पर्शैकसंख्यापरिमाणैकपृथक्त्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दा इत्यर्थः॥ बुद्ध्यादिषट्क
स्पर्शान्तेति॥ अदृष्टभावनाशब्दा अमी इति॥ बुद्धिसुखदुःखेच्छाद्वेषप्रयत्ना इत्यर्थः॥ स्पर्शान्ता रूपरसगंधस्पर्शा इत्यर्थः॥ द्रवः द्रवत्वं॥
विशेषा एव वैशेषिकाः॥ स्वार्थे ठक्॥ विशेषगुणा इत्यर्थः॥ संख्यादीति॥ गुरुत्ववेगेति॥ संख्यापरिमाणपृथक्त्वसंयोगविभाग
परत्वापरत्वानीत्यर्थः॥ संख्यादिरपरत्वान्तेति॥ एते बुद्धीन्द्रियग्राह्याः॥ चाक्षुषत्वस्पार्शनत्वयोग्यत्वात्॥ अथ स्पर्शान्त
शब्दकाः॥ बाह्यैकैकेन्द्रियग्राह्याः॥ रूपादीनां चक्षुरादिग्राह्यत्वात्॥ गुरुत्वादृष्टभावनाः॥ अतीन्द्रियेति॥ अकार
णगुणोत्पन्नेति॥ बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा इत्यर्थः॥ कारणगुणेन कार्यगुणा उत्पद्यन्ते ते कारणगुण
पूर्वका रूपादयो वक्ष्यन्ते॥ बुध्यादयस्तु नैतादृशाः॥ आत्मादेः कारणाभावात्॥ अपाकजास्तु स्पर्शान्तेति॥ स्नेहवेगगुरुत्वैकेति॥
स्थितिस्थापकेति॥ पाकजरूपादीनां कारणगुणपूर्वकत्वाभावादपाकजा इत्युक्तं॥ तथापि न अपाकजं॥ तथा एकत्वमपि

बोध्यं॥ संयोगश्च विभागश्च वेगश्चेति। कर्मजत्वं च घापितसा चर्म्ये। घटादावतिव्याप्तिः। संयोगजसंयोगे अव्याप्तिः। तथापि विकर्म अन्यवृत्ति
गुणत्वव्याप्य जातिमत्त्वं बोध्यं। एवमग्रेऽप्यूह्यं॥ स्पर्शान्तपरिमाणे केति। भवेदसमवायित्वेति। घटादीनां रूपरसगंधस्पर्शाः कपालरूपादि
रूपरसगंधस्पर्शेभ्यो भवंतीति। एवं कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायिकारणत्वं। शब्दस्यापि द्वितीयशब्दं प्रति। एवं

स्थितिस्थापकैकत्वयोरपि ज्ञेयं॥ अथ वैशेषिकेति। आत्मनस्येति। बुद्ध्यादीनामिच्छाद्युत्पत्तिनिमित्तत्वादिति भावः॥ उष्णस्पर्शगुरुत्वयोः
वेगाधिचेति। द्वैविध्यमिति। असमवायिकारणत्वं निमित्तकारणत्वं च॥ तथाहि। उष्णस्पर्शे समवायि। पाकजे निमित्तं गुरुत्वं गुरुत्वपतन
नयोरसमवायिकारणं॥ अभिघाते निमित्तं। वेगो वेगस्पंदयोरसमवायि॥ अभिघाते निमित्तं॥ द्रवत्वं द्रवत्वस्यंदयोरसमवायिकार
णं। संस्कारे निमित्तं। भेरीदंडसंयोगः शब्दे निमित्तं। भेर्याकाशसंयोगोऽसमवायि। वंशदलद्वयविभागः शब्दे निमित्तं। वंशदलाकाशवि
भागोऽसमवायीति। अथ प्रादेशिको भवेत्। वैशेषिकाद्यनुगुणः संयोगादिद्वयं लब्धं॥ प्रादेशिकः अव्याप्यवृत्तिः। चक्षुर्ग्नात्पानि श्रीशिव
ति। संरूपत्वादिर्जातिस्तन्मनस्तसिद्धा॥ रूपशब्दाल्लुरवनीप्रतीतिर्नास्तीति चेत्॥ मास्तु पररूपशब्दप्रयोगः। तथापि नीलपीतादिष्वनु २१
गतजातिविशेषा अनुभवसिद्ध एव रूपशब्दाप्रयोगेऽपि नीलो वर्णः पीतो वर्ण इति वर्णशब्दाल्लुरवनीप्रतीतिरस्त्येव॥ एवं नीलत्वा
दिकं प्रत्यक्षसिद्धं॥ न चैकैका एव नीलरूपादिव्यक्तय इत्येकव्यक्तिवृत्तित्वान्नीलत्वादिकं न जातिरिति वाच्यं। नीलो नष्टो रक्तोत्पन्न

इत्यादिप्रतीतेः॥ नीलादिरूपोत्पादविनाशशालीया तन्नानात्वात्। अन्यथा एकनीलनाशे जगत् अनीलमापद्यते॥ न च नीलसमवायरक्तरस
मवाययोरेव विनाशोत्पादकविषयकोऽसौ प्रत्यय इति वाच्यं॥ प्रतीत्यासमवायविषयानुल्लेखात्॥ न च स एवायं नील इति प्रत्यक्षात् लाघ
वा ऐक्यमिति वाच्यं। प्रत्यक्षस्य तज्जातीयत्वविषयात्। सैवेयं गुर्जरीतिवत्। लाघवं तु प्रत्यक्षबाधितं। अन्यथा घटादीनामप्येकत्वप्रस
गादुत्पादविनाशबुद्धेः समवायावलंबनत्वापत्तेरिति। एतेन रसादिकं व्याख्यातं। चक्षुर्ग्राह्यमिति। चक्षुर्मात्रग्राह्यविशेषगुण इत्यर्थः। एवमग्रे
पि। द्रव्यादिरूपलंभकं। उपलब्धिकारणं॥ तदेव विवृणोतीति। चक्षुषः सहकारि स्यात्। द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति उद्भूत
रूपं कारणं॥ शुक्लादिकमनेकधा॥ तद्रूपं शुक्लनीलरक्तपीतकर्बुरादिभेदादनेकप्रकारकं भवति। ननु कर्बुरं कथमिति रचेत्रूपं॥
इत्थं नीलपीताद्यारब्धोऽवयविनि तावन्नीरूपोऽप्रत्यक्षप्रसंगात्॥ नापि व्याप्यवृत्ति नीलादिरूपमुत्पद्यते। पीतत्वावच्छेदेनापि नीलो
पलब्धिप्रसंगात्। नाप्यव्याप्यवृत्ति नीलादिकमुत्पद्यते। व्याप्यवृत्तिगुणानामव्याप्यवृत्तिजातित्वे विरोधात्॥ तस्मान्नाना
जातीयरूपैरवयविनि विजातीयं चित्ररूपमारभ्यते॥ अत एवैकं चित्ररूपमित्यनुभवोऽपि। नानारूपकल्पने गौरवात्। इत्थं च
नीलादिनापि नाऽऽरंभप्रतिबंधकत्वकल्पनाद्वयविनि न पीताद्युत्पत्तिः॥ एतेन स्पर्शोऽपि व्याख्यातः॥ रसादिकमपि नाव्याप्यवृत्ति किंतु
नानाजातीयरसवदवयवैरारब्धेऽवयविनि नीरसाभावेन सर्तिः। तत्र रसनया अवयवरस एव गृह्यते। रसनेंद्रियादीनाप्रत्यग्रहे

सि·मु·प्र·शा·खं३· सामर्थ्याभावात्॥ अवयविनीरसत्वेपि सतेरभावात्॥ नव्यास्तु॥ तत्रव्याप्यवृत्तेनानारूपं।नीलादिः पीतादिश्चेतिनधाकत्वकल्पने
गौरवात्॥ अतएवलोहितोयस्तुवर्णेनमुखेपुच्छेचपाण्डुरः॥ श्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यते॥१॥ नचाव्याप्यवृत्तिनाना
३८ तीयद्वयोर्विरोधः॥ मानाभावात्।नचलोपवादिकं।अनुभवविरोधात्।अन्यथाघटादेरपिलोपवादिकंस्यादिति।जलादिपरमाणौतु
तन्नित्यमन्यत्सहेतुकं।जलपरमाणौतेजःपरमाणौचरूपंनित्यं।पृथिवीपरमाणुरूपंननित्यं।तत्रपाकेनरूपान्तरोत्पत्तेः।नहिघटस्य
पाकानन्तरंतदवयवेऽपूर्वरूपमुपलभ्यते।नहिरक्तकपालकेनीलावयवं भवति।एवंक्रमेणपरमाणावपिपाकसिद्धेः।अन्यत्तुज
लतेजःपरमाणुरूपभिन्नंरूपंसहेतुकं॥ रसंनिरूपयति॥ रसस्त्विति।सहकारीति।घ्राणेति।सौरभंचेति।स्पर्शस्त्विति।अनु
ष्णाशीतेति।काठिन्यादीति।एतेषामिति।तत्रापीति।सहकारी।रासनप्रत्यक्षेरसःकारणमित्यर्थः।पूर्ववत्।जलपरमाणौर
सोनित्यः अन्यः सर्वोप्यनित्यः॥ गन्धंनिरूपयति॥ घ्राणेति।उपकारकः।स्पार्शनप्रत्यक्षेस्पर्शःकारणमित्यर्थः।सौर श्रीशिव
भंचेति।सर्वोपिगन्धोऽनित्यएव।स्पर्शंनिरूपयति।स्पर्शइति॥ उपकारकःस्पार्शनप्रत्यक्षेस्पर्शःकारणमित्यर्थः।अनुष्णाशीत
ति।पृथिव्यावायोश्चस्पर्शोऽनुष्णाशीतः।जलस्यशीतः।तेजसउष्णः।काठिन्यसुकुमारस्पर्शःपृथिव्याएवेत्यर्थः॥ काठिन ३८
त्वादिकंतुनसंयोगगतोजातिविशेषः॥ [illegible]त्यापत्तेः।पूर्ववत्।जलतेजोवायुपरमाणुस्पर्शानित्यास्तद्भिन्नस्पर्शा

स्त्वनित्याइत्यर्थः॥ एतेषां।रूपरसगन्धस्पर्शानां।पृथिव्यांहिरूपरसगन्धस्पर्शपरावृत्तिरग्निसंयोगादुपलभ्यते॥ नहिशतआध्मायमानेजलेरू
पादिपरावर्त्तते॥ नीरसौरभमौष्ण्याचान्वयव्यतिरेकाभ्यामौपाधिकमेवेतिनिर्णीयते।पवनपृथिव्योः॥ शीतस्पर्शादिवत्।तत्रापिपृथिवीष्वपि
मध्येपरमाणाविवपाकरीतिवैशेषिकाणांदृति।तेषामयमाशयः॥ अवयविनावष्टब्धेषुअवयवेषुपाकोनसम्भवति॥ परंतुवह्निसंयोगेन
अवयवेषुनष्टेषुस्वतन्त्रेषुपरमाणुषुपाकःपुनश्चपक्वपरमाणुसंयोगाद्व्यणुकादिक्रमेणपुनर्महावयविपर्यन्तमुत्पत्तिः॥ तेजसामति
शयितवेगवशात्पूर्वव्यूहनाशोझटितिव्यूहान्तरोत्पत्तिश्चेति। अथद्व्यणुकादिविनाशमारभ्यकतिभिःक्षणैःपुनरुत्पत्त्यारूपा
दिमद्भवतीतिविशेषबुद्धिवैशद्यायप्रक्रिया।तत्रचविभागजविभागानङ्गीकारेनवक्षणा।तदङ्गीकारेऽपिविभागः॥किञ्चित्सापेक्षा
ग विभागजननेतुनिरपेक्षस्यतत्वेकर्मत्वंस्यात्॥ संयोगविभागयोरनपेक्षकारणंकर्मेतिवैशेषिकसूत्रं॥ स्वोत्तरभावेविभा
गानपेक्षत्वेनस्यादयं॥ अन्यथाकर्मणाप्युत्तरसंयोगजननेनपूर्वसंयोगनाशापेक्षणाद्व्याप्तिःस्यादिति।तत्रद्रव्यारम्भकसंयोग
विनाशविशिष्टकालमपेक्ष्यविभागजविभागःस्यात्तदादशक्षणा॥ अथद्रव्यनाशविशिष्टकालमपेक्ष्यतेतदैकादशक्षणा॥ त
थाहि।वह्निसंयोगात्परमाणौकर्मततःपरमाण्वन्तरेणविभागः।आरम्भकसंयोगनाशः।ततोद्व्यणुकनाशःपरमाणौश्या
मादिनाशः।ततोरक्ताद्युत्पत्तिः।ततोद्रव्यारम्भानुगुणाक्रिया।ततोविभागः।ततःपूर्वसंयोगनाशः।ततःआरम्भकसंयोगःत

सि॰मु॰शा॰द्र॰खं॰ तो द्व्यणुकोत्पत्तिः। ततो रूपाद्युत्पत्तिः॥ ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा। परमाणौ द्रव्यारम्भानुगुणा क्रिया अस्त्विति
चेन्न॥ अग्निसंयुक्ते परमाणौ कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च तत्र परमाणौ क्रियान्तराभावात्। कर्मवति कर्मान्तरानुत्पत्तेः। नि
गुणद्रव्यारम्भानुगुणा क्रियानुत्पत्तेश्च। तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेन्न। पूर्वरूपादिध्वंसस्यापि रू
पान्तरहेतुत्वात्। अथ दशक्षणा॥ साऽऽरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजननेन सर्वत्र स्यात्। तथाहि। वह्नि
संयोगाद्द्व्यणुकारम्भके परमाणौ कर्म। ततो विभागः। ततः आरम्भकसंयोगनाशः। ततो द्व्यणुकादिनाशविभागजविभागौ। ततः
श्यामनाशपूर्वसंयोगनाशौ। ततो रक्तोत्पत्त्युत्तरसंयोगौ। ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः॥ अदृष्टवदात्मसंयोगात् [illegible]
द्रव्यारम्भानुगुणा क्रिया॥ ततो विभागः। ततश्च पूर्वसंयोगनाशः। ततः आरम्भकसंयोगः। ततो द्व्यणुकोत्पत्तिः॥ अथारम्भकोत्पत्तिः
अथैकादशक्षणा॥ वह्निसंयोगात्परमाणौ कर्म। ततो विभागः। ततो द्व्यारम्भकसंयोगनाशः। ततो द्व्यणुकनाशः। ततो द्व्यणुकना
शविशिष्टं कालमपेक्ष्य विभागजविभागश्यामनाशौ। ततः पूर्वसंयोगनाशरक्तोत्पत्ती। तत उत्तरदेशसंयोगः। ततः परमाणुकर्मना
शः। ततोऽदृष्टवदात्मसंयोगाद्द्रव्यारम्भानुगुणा क्रिया। ततो विभागः। ततः पूर्वसंयोगनाशः। ततो द्व्यारम्भकसंयोगः। ततो द्व्यणुक॰
ततो रक्तादि॥ मध्यमशब्दवदेकस्मादग्निसंयोगाद्रूपनाशोत्पादाद्यावत्कालमेकस्याग्निसंयोगस्य स्थिरत्वात्॥ किंच॥ यद्युत्पाद

कनाशकस्य दहनस्य रूपादौ अग्निनाशे भिन्नरूपश्चेत्परमाणुः स्यात्। नाशकश्चेदुत्पादकस्तदा रक्तोत्पत्तौ तदग्निनाशे रक्ततारतम्यं न
स्यात्॥ परमाण्वन्तरे कर्मचिन्तनात्पञ्चमादिक्षणेऽपि गुणोत्पत्तिः। तथाहि॥ एकत्र परमाणौ कर्म। ततो विभागः। ततः आरम्भकसंयो
गनाशपरमाण्वन्तरे कर्मणी॥ ततो द्व्यणुकनाशः। परमाण्वन्तरकर्मजश्च विभाग इत्येकः कालः॥ ततः श्यामादिनाशविभागात् पू
र्वसंयोगनाश इत्येकः कालः॥ ततो रक्तोत्पत्तिः। द्व्यारम्भकसंयोग इत्येकः कालः॥ अथ द्व्यणुकोत्पत्तिः। अथ रक्तोत्पत्तिरिति
पञ्चक्षणा॥ द्व्यणुकनाशसमकाले परमाण्वन्तरे कर्मचिन्तनात् षष्ठे गुणोत्पत्तिः। तथाहि। परमाणुकर्मणा परमाण्वन्तरविभागस्तत
आरम्भकसंयोगनाशस्ततो द्व्यणुकनाशपरमाण्वन्तरकर्म(णी)॥ अथ श्यामादिनाशः परमाण्वन्तरे कर्मजविभागजश्च ततो र
क्तोत्पत्तिः। परमाण्वन्तरे पूर्वसंयोगनाशश्च ततः परमाण्वन्तरसंयोगः। ततो द्व्यणुकोत्पत्तिरिति। एवं श्यामादिनाशक्षणे परमा
ण्वन्तरे कर्मचिन्तनात्सप्तक्षणा॥ तथाहि॥ परमाणौ कर्म ततः परमाण्वन्तरविभागः। ततः आरम्भकसंयोगनाशः। ततो द्व्यणुक
नाशः। ततः श्यामनाशपरमाण्वन्तरकर्मणी॥ ततो रक्तोत्पत्तिः परमाण्वन्तरकर्मजविभागौ॥ परमाण्वन्तरे कर्मसंयोगनाशः। ततः
परमाण्वन्तरसंयोगः। ततो द्व्यणुकोत्पत्तिः। ततो रक्तोत्पत्तिरिति। रक्तोत्पत्तिसमकाले परमाण्वन्तरे कर्मचिन्तनादष्टक्षणा इति॥
नैयायिकानां तु नये द्व्यणुकादावपीष्यते। नैयायिकानां मते द्व्यणुकाद्यवयविन्यपि पाको भवति। तेषामयमाशयः॥ अव

सि॰मु॰टी॰ख॰ ४ यदि नासच्छिद्रत्वाद्वन्हेः सूक्ष्मावयवैरंतः प्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते। अनंतावयवतन्नाशकल्पने गौरवं च।
इत्थं च सोयं घट इत्यादिप्रत्यभिज्ञापि संगच्छते। यत्र तु न प्रत्यभिज्ञा तत्रावयवविनाशोपि स्वीक्रियते॥ संख्यां निरूपयितुमा
ह। गणनाव्यवहारेति। गणनाव्यवहारासाधारणं कारणं संख्येत्यर्थः॥ नित्येषु नित्यमेकत्वमिति। द्वित्वादयः परार्द्धांता इति। अ
नेकाश्रयपर्याप्ता इति। नित्येषु परमाण्वादिषु एकत्वं नित्यं। अनित्येषु घटादावेकत्वमनित्यमित्यर्थः। द्वित्वादयो व्यासज्यवृत्तिसंख्या
अपेक्षाबुद्धिजन्या। यद्यपि द्वित्वादिसंबंधः प्रत्येकं घटादावपि वर्त्तते। तथापि एको द्वाविति प्रत्ययाभावादेको न द्वाविति प्रत्ययस
सद्भावाच्च द्वित्वादीनां पर्याप्त्याख्यः कश्चित्संबंधः अनेकाश्रयोऽभ्युपगम्यते। अपेक्षाबुद्धिनाश्यश्चेति॥ प्रथमं अपेक्षाबुद्धिः ततो
द्वित्वोत्पत्तिः ततः। विशेषणज्ञानं द्वित्वत्वनिर्विकल्पकात्मकं। ततो द्वित्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च ततो द्वित्वनाश इति। श्रीराम
यद्यपि ज्ञानानां द्विक्षणमात्रस्थायित्वं योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वात्। तथापि अपेक्षाबुद्धेस्त्रिक्षणावस्थायि ४
त्वं कल्प्यते। अन्यथा निर्विकल्पककाले अपेक्षाबुद्धिनाशे तेनैव द्वित्वस्यैव नाशः स्यात्। न तु द्वित्वप्रत्यक्षं। तदानीं विषयाभावाद्द्वित्वमान
स्यैव चाक्षुषादिना ज्ञानजनने नोपगमात्। तस्माद्द्वित्वप्रत्यक्षात्पूर्वं किं अपेक्षाबुद्धिनाशकत्वं कल्प्यते। न चापेक्षाबुद्धिनाशात् कथं द्वित्वना
श इति वाच्यं॥ कालांतरे द्वित्वप्रत्यक्षाभावादपेक्षाबुद्धिस्तदुत्पादिका तन्नाशः तन्नाश इति कल्प्यते। अत एव तत्पुरुषीयापेक्षाबुद्धिज

न्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते। न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षकारणमस्त्विति वाच्यं लाघवेन द्वित्वं प्रति कारणत्वस्यैवोचितत्वा
त्। अतींद्रियद्व्यणुकादौ अपेक्षाबुद्धिर्योगिनां सर्गादिकालीनपरमाण्वादौ ईश्वरापेक्षाबुद्धिर्ब्रह्मांडांतरवर्त्तियोगिनामपेक्षाबुद्धिर्वेति॥ द्वि
कारणमिति। अपेक्षाबुद्धिं कथयन्नाह॥ अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते इति। अयमेकः अयमेक इत्याकारिकेत्यर्थः॥ परिमा
णं निरूपयति॥ परिमाणं भवेन्मानमिति। अणु दीर्घमिति। अनित्येति। संख्यातः परिमाणाच्चेति। अनित्यं द्व्यणुकादौ तु इति। परिमाणपदार्थवि
ति॥ परिमाणव्यवहारासाधारणकारणं परिमाणमित्यर्थः। तच्चतुर्विधं। अणु महद्दीर्घं ह्रस्वं चेति। तत्परिमाणं नित्यमनित्यं च परिमाणं अनु
पन्यत्। जायतस्तत्रापि परिमाणमित्यत्रानुवर्त्तते। अनित्यं जनितपूर्वेणान्वितं। तथा चानित्यपरिमाणं संख्याजन्यपरिमाणजन्यप्रचय
जन्यं चेत्यर्थः। तत्र संख्याजन्यमुदाहरति॥ द्व्यणुकादावित्यादिना॥ द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं वा न कार
णं। परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात्॥ द्व्यणुकस्याणुपरिमाणं तु परमाणुवदणुत्वापेक्षया नोत्कृष्टं त्रसरेणुप
रिमाणं तु न सजातीयं। अतः परिमाणो द्वित्वसंख्या द्व्यणुकपरिमाणस्य। द्व्यणुके त्रित्वसंख्या त्रसरेणुपरिमाणस्यासमवायि
कारणमित्यर्थः॥ परिमाणजन्यमुदाहरति। परिमाणं घटादावित्यादि। घटादिपरिमाणं कपालादिपरिमाणजन्यं प्रचयजन्यमुदा
हरति॥ प्रचयः शिथिलाख्यो यः इति। परिमाणं तूलकादाविति॥ नाशस्त्वाश्रयनाशात्परिमाणस्य॥ पृथक्त्वं निरूपयति॥ संख्याव

सि॰मु॰ गाखरवं॰ नुपृथक्त्वस्याह पृथक्प्रत्ययकारणं॥ पृथक्प्रत्ययस्यासाधारणं कारणं पृथक्त्वं॥ तन्नित्यादिकं संख्यावत्॥ तथाहि॥ नित्येषु
नित्यमेकपृथक्त्वं। अनित्ये अनित्यं। अनित्यं एकत्वसमानाश्रयाहूति यत्क्षणे चोत्पद्यते॥ आश्रयनाशान्नश्यति॥ तथा एकपृथ
४१ क्त्वादिकमपि। द्वित्वादिवद्द्विपृथक्त्वादिकमपीत्यर्थः॥ ननु अयमस्मात्पृथगित्यादावन्योन्याभावो भासते तत्कथं पृथक्त्वं गुणा
न्तरं स्वीक्रियते। न च पृथक्त्वमेवास्तु न त्वन्योन्याभाव इति वाच्यं। रूपं न घट इति प्रतीत्यनापत्तेः॥ नहि रूपे घटावधिकं
पृथक्त्वं गुणान्तरमस्ति न वा घटे घटावधिकं पृथक्त्वमस्ति येन परंपरासंबंधेन धीः कल्प्यत इत्यत आह॥ अन्योन्याभावतो।
विलक्षणेति। न तु शब्दवैलक्षण्यमेवानन्यथावैलक्षण्यमिति चेन्न॥ विनार्थमिदं घटात्पृथगिति वत् घटान्नेत्यत्रापि पंचमी
प्रसंगात्॥ तस्मादवधिकयोगे पंचमी सोर्थो न अर्थान्योन्याभावतो भिन्नो गुणान्तरं कल्प्यत इति॥ संयोगं निरूपयति॥ श्रीशिव
अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः॥ तं विभजते॥ कीर्तितस्त्रिविधेति। तथा भवतीति। आदिमेति। मेषयोरिति। कपा ४१
लतरूपेति। तृतीयः स्यादिति। अभिघातेति। शब्दहेतुर्द्वितीयः स्यात्। एषः संयोगः सन्निपातः संयोगः॥ द्वितीय उभयकर्मजः॥ तृतीयः
संयोगजसंयोग इत्यर्थः॥ तृतीयः स्यादित्यपि पूर्वेणान्वितं। आदिमः अभिघातः॥ द्वितीयः नोदनाख्यः संयोगः॥ विभक्तप्रत्य
यासाधारणं कारणं विभागः॥ तन्निरूपयति॥ विभागोऽपि त्रिधा भवेत्॥ एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवः परः॥ विभा

गजस्तृतीयः स्यात् इति॥ हेतुमात्रेति। उदाहरणं तु श्येनशैलविभागादिकं पूर्ववद्बोध्यं। तृतीये विभागजः॥ कारणमात्रवि
भागजन्यः॥ कारणाकारणविभागजश्चेति॥ आद्यस्तावद्यत्र एककपाले कर्म॥ ततः कपालद्वयविभागः॥ ततो घटारंभकसं
योगनाशः॥ ततो घटनाशः॥ न. तस्मिन्नेव कपाले तेनैव विभागेन सकर्मणः कपालस्याकाशादिविभागो जन्यते। ततस्तद्देशसंयो
गनाशः॥ तत उत्तरदेशसंयोगस्ततः कर्मनाश इति। न चैतेनैव कर्मणा कथं देशान्तरविभागो न जन्यत इति वाच्यं॥ एकस्य कर्मणः
आरंभकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारंभकसंयोगप्रतिद्वन्द्विविभागजनकत्वेन विरोधात्॥ अन्यथा विकसत्
कमलकुड्मलभंगप्रसंगात्॥ तस्माद्यदि अनारंभकसंयोगप्रतिद्वन्द्विविभागं जनयेत् तदारंभकसंयोगप्रतिद्वन्द्विविभागं
न जनयेत्। न च कारणविभागेनैव द्रव्यनाशात्पूर्वं कुतो देशान्तरविभागो न जन्यत इति वाच्यं। आरंभकसंयोगप्रतिद्वन्द्वि
विभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभागासंभवात्॥ द्वितीयस्तावद्यत्र हस्तक्रियया हस्ततरुविभागः ततः शरीरेऽपि
विभक्तप्रत्ययो भवति। तत्र च शरीरतरुविभागे हस्तक्रिया न कारणं॥ व्यधिकरणत्वात्॥ शरीरे तु क्रिया नास्ति अवयविकर्म
णो यावदवयवकर्मनियतत्वात् तस्मात्कारणाकारणविभागेन कार्यविभागो जन्यत इति॥ अत एव विभागो गुणान्तरं॥ अन्यथा शरी
रविभागप्रत्ययो न स्यात् ततः संयोगनाशेनाविभागेनान्यथासिद्धो भवति॥ परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति॥

परत्वं चापरत्वं च द्विधैव परिकीर्तितं ॥ दैशिकं कालिकं मिति ॥ परत्वस्य संयोगेति । अपरत्वं न द्रव्यस्येति । तयोः समवायिनि
दैशिकपरत्वं ॥ बहुतरसूर्यसंयोगान्तरितत्वात् । नादुत्पद्यते । एतद्दल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते । अत्रावधित्वार्थं पंचम्यापेक्षाय
था पाटलिपुरात्काशीमपेक्ष्य प्रयागः परः पाटलिपुरात्कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति ॥ तयोः दैशिकपरत्वापरत्वयोः । असम

वायी ॥ असमवायीकारणं । तदाश्रये । दैशिकपरत्वापरत्वाश्रये । दिवाकरपरिस्पंदभूयस्त्वज्ञानतो भवेत् ॥ परत्वमपरत्वं तु तदी
यात्मबुद्धिनेति । अत्र त्व समवायीति । अपेक्षाबुद्धिनाशेनेति । अत्र परत्वमपरत्वं च कालिकं बोध्यं ॥ यस्य सूर्यपरिस्पंदा
पेक्षया । यस्य सूर्यपरिस्पंदः अधिकः स ज्येष्ठः ॥ यस्य न्यून स कनिष्ठः ॥ कालिकपरत्वापरत्वे जन्य द्रव्य एव । अत्र कालिकप
रत्वापरत्वयोः । एषां कालिकदैशिकपरत्वापरत्वानां । क्रमप्राप्तां बुद्धिं निरूपयितुमाह ॥ बुद्धेः प्रपंचः प्रागेव प्रायशो विनि श्रीशिव
रूपितः ॥ अथ । विशिष्योऽथ परः प्रकारः परिदृश्यते । अप्रमा च प्रमा चेतीति । अप्रमां निरूपयति ॥ तच्छून्ये तन्मतिर्यास्येति ।
तत्प्रपंचोऽपीति । आद्यो देहीति । भवेन्निश्चयरूपा सा ॥ तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः ॥ तत्प्रपंचः ॥ अप्रमाप्रपंचः ॥
आद्यो विपर्यास इत्यर्थः । शरीरादौ निश्चयरूपं यदात्मत्वप्रकारकं ज्ञानं । गौरोऽहमित्याद्याकारकं । शंखादौ पीतः शंख इत्याद्या
कारकं ज्ञानं यन्निश्चयरूपं तद्भ्रम इति । संशयोऽथ प्रदर्श्यते ॥ किंस्विन्नरो वेति । किंस्विदिति वितर्के । निश्चयलक्षणमाह ॥ ।

तदभाववेति । तदभाववदप्रकारकं तत्प्रकारकं ज्ञानं निश्चयः ॥ संशयं लक्षयति । संशयेति । साधारणादीति । एकधर्मिकविरुद्ध
भावाभावप्रकारकं ज्ञानं संशय इत्यर्थः ॥ उभयसाधारणो धर्मस्तज्ज्ञानं संशयकारणं । यथा उच्चैस्तरत्वं स्थाणुवस्थाणुसा
धारणं ज्ञात्वा स्थाणुर्नवेति संदिग्धे । एवमसाधारणधर्मज्ञानं कारणं । यथा शब्दत्वं नित्यानित्यव्यावृत्तं संशये गृहीत्वा शब्दो
नित्यो न चेत्यादिशब्दः किमिका न संशयकारणं । शब्दत्वा नित्यज्ञानादीनां निश्चयमात्रजनकत्वस्वभावात् । किंतु ॥ तत्रश
ब्देन कोटिज्ञानं अन्यत्वे संशयसत्कामा न सत्त्वेति । एवं ज्ञानप्रामाण्यसंशयाद्विषयसंशयः ॥ एवं व्याप्यसंशयादपि व्यापकसं
शय इत्यादिकं बोध्यं । किंतु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति । दोषोऽप्रमाया जनकः प्रमायास्तु गुणो
भवेत् ॥ अप्रमां प्रति दोषः कारणं । प्रमां प्रति गुणः कारणं । तत्रापि पित्तदूरत्वादिरूपा दोषा अननुगतास्तेषां कारणत्वमन्वयव्यतिरे
काद्दवसिद्धं ॥ गुणस्य प्रमाजनकत्वं तु अनुमानात्सिद्धं ॥ यथा प्रमा ज्ञानसामान्यकारणभिन्नकारणा । जन्या । अन्यज्ञानवा
दप्रमावत् । न च दोषाभावस्यैव कारणमस्त्विति वाच्यं । पीतः शंख इति ज्ञाने स्थले पित्तरूपदोषसत्त्वाच्छंखप्रमानुत्पत्तिप्र
संगात् । विनिगमनाविरहात् नतदोषाभावकारणत्वमपेक्ष्य गुणकारणतायाः न्याय्यत्वात् ॥ न च गुणसत्त्वेऽपि पित्त
नप्रतिबंधाच्छंखेन श्वेत्यज्ञानं । अतः पित्तादिदोषाभावानां कारणत्वं अवश्यं वाच्यं । तथा च किं गुणस्य हेतुत्वकल्पनं

सि.मु.व.टी.

४३ नेनेतिवाच्यं। तथापि अन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः। एवं भ्रमे प्रतिगुणाभावः कारणमित्यस्यापि स्व
यं चत्वात्। तत्र दोषाः के इत्याकांक्षायामाह। पित्तदूरत्वादिरूपो दोषो नानाविधो भ्रमत्वे। क्वचित् पीतादिभ्रमे पित्तादि
दोषः। क्वचिच्चन्द्रादेः स्वल्पपरिमाणग्रहे दूरत्वं दोषः। क्वचित् अवंशे उरगभ्रमे मण्डूकवसाञ्जनं इत्येवमादयो दोषाः। अननु
गताः एवं भ्रान्तिजनकाः इत्यर्थः। अथ के गुणाः इत्यपेक्षायां प्रत्यक्षादौ क्रमेण गुणान् दर्शयति॥ प्रत्यक्षेत्विति। सन्निक
र्षो गुण इति। यस्मिन् भावविशिष्टे त्विति। शब्द्यते नाहू रये ति। शाब्दबोधे तु गुणः स्यात्। प्रत्यक्षे विशेषणवद्विशेष्यसन्नि
कर्षो गुणः। अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुणः। एवमग्रेप्यूह्यं॥ प्रमात्वं दर्शयति॥ ॥
भ्रमभिन्नेति। ननु यत्र शुक्तिरजतयोः इमे रजते इति ज्ञानं जातं तत्र रजतांशेपि प्रमा न स्यात्। तत्र ज्ञानस्य भ्रमभिन्नत्वा श्रीशिव
भावादत आह॥ ~~नत्वमिति~~। अथवेति। तत्प्रमा। तद्वद्विशेष्यकत्वे सति तत्प्रकारकं ज्ञानं प्रमेत्यर्थः। एवं सति निर्विकल्पक ४३
प्रमा न स्यात् तस्य सप्रकारकत्वाभावादत आह। नत्वमिति। प्रकारकत्वं न्यूनयति। ननु ध्वंसकपिसंयोगज्ञानमपि भ्रम प्र
मा च स्यादिति चेन्न॥ प्रतियोगिव्यधिकरणसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात्। न च ध्वंसकपिसंयोगा
भावविच्छेदकावच्छेदेन संयोगज्ञानं भ्रमं न स्यात्। तत्र संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वादिति वाच्यं।

प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ४

संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात्। तस्याननुगमात् लक्षणाननुगमे विनिक्षति। मीमांसका हि प्रमात्वं स्वतो ग्राह्य
मिति वदन्ति। तत्र गुरूणां मते ज्ञानस्य स्वतः प्रकाशत्वात् ज्ञानप्रामाण्यं तेनैव गृह्यत इति। भट्टानां मते तु ज्ञानमतीन्द्रियं ज्ञानज
न्या ज्ञातता प्रत्यक्षा तया च ज्ञानमनुमीयते। मुरारिमिश्राणां मते अनुव्यवसायेन ज्ञानं गृह्यत इति सर्वेषां मतेपि तत्तज्ज्ञानविष
यकज्ञानेन तद्ज्ञानप्रामाण्यं गृह्यते। विषयानिरूप्यं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषयः॥ तन्मतं दूषयति। प्रमात्वं नेति। य
दि ज्ञानप्रामाण्यं स्वतो ग्राह्यं स्यात्तदा अनभ्यासदशायां ज्ञाने प्रामाण्यसंशयो न स्यात्। तत्र हि यदा ज्ञानं ज्ञातं तदा ज्ञा
ने प्रामाण्यं ज्ञातमेवेति कथं संशयः। यदि तु ज्ञानं न ज्ञातं तदा धर्मिज्ञानाभावात् कथं संशयः॥ तस्मात् ज्ञाने प्रामा
ण्यमनुमेयं॥ तथा हि॥ इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात्॥ एवं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्व प्र २
प्रकारकज्ञानत्वात्॥ एवं इदं जलत्वप्रकारकं ज्ञानं प्रमा स्नेहवति जलत्वप्रकारकत्वात्। न च हेतुज्ञानं कथं जायतामिति
वाच्यं। पृथिवीत्वप्रकारकत्वस्य स्वतो ग्राह्यत्वात् तत्र गन्धग्रहणे गन्धवद्विशेष्यकत्वस्य सुग्रहत्वात्। तत्प्रकारकत्वा
वच्छिन्नतद्विशेष्यकत्वपरं न गृह्यते॥ संशयानुरोधात्॥ ननु प्रमात्वस्य सावर्ण्यस्य प्रसिद्धिः कथमिति वाच्यं। इदं ज्ञाने
प्रमात्वस्य स्वतो ग्राह्यत्वात्। न प्रकार भेदेन प्रामाण्यभेदात्॥ घटत्ववति घटत्वप्रकारकत्वादेः कथं प्रसि

सि.मु.नली. शाद्रत्वेद्धिरितिवाच्यं॥ घटत्वप्रकारकत्वस्य सविशेष्यकत्वस्य च स्वेनोपस्थितत्वात्॥ घटस्य चानुपस्थितत्वात्॥ घटविशेष्यकं घटत्व
प्रकारकमिति ज्ञाने बाधकाभावात्॥ अनुव्यवसायेन परं तन्न गृह्यते। तत्र संशयसामग्रीसत्त्वे संशयस्यैवोत्पत्तेः। किंच अभ्यासद
४४ शायां तत्तीयानुव्यवसायादीनां प्रामाण्यस्य स्वतस्त्वग्रहात्॥ व्याप्तिग्रहसंभवात्॥ प्रथमानुव्यवसायेऽपि न तद्ग्राहकत्वमिति तत्क
ल्प्यते॥ संशयानुरोधात्॥ अथ प्रामाण्यानुमितेः प्रामाण्याग्रहे तस्य विषयनिश्चायकत्वं न स्यात् अतस्तद्ग्रहो वाच्यः। सोऽप्यनु — न संभवति
मित्यन्तरेण वाच्यः। एवं प्रामाण्यानुमितिजनकत्वे तु ज्ञानोद्विषयनिश्चयरूपत्वार्थं तत्र प्रामाण्यनिश्चयो वाच्यः॥
सप्याप्यनुमित्यन्तरेणेति फलमुखी कारणमुखी चानवस्थेति चेन्न। अगृहीताप्रामाण्यकज्ञानस्यैव विषयनि
य॰ श्चायकत्वात्॥ यत्र तु अप्रामाण्यसंशयस्तत्रैव परं प्रामाण्यानुमितेरपेक्षा यावदाशंकं प्रामाण्यानुमितिरिष्यत
एव सर्वत्रानुनसंशयः॥ क्वचित्कोट्यनुपस्थितेः॥ क्वचिद्विशेषदर्शनादितः क्वचिद्विषयान्तरसंचारादितिसंक्षेपः॥ ७२॥ श्रीरीव
ननु सर्वेषां ज्ञानानां याथार्थ्यात् प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणं व्यर्थं॥ न च रंगे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न ४४
स्यात्॥ तव मते भ्रमस्याभावादिति वाच्यं। तत्र हि रागाधीनस्य पुरोवर्तिनि स्वतंत्रोपस्थितरजतभेदाग्रहस्य
हेतुत्वात्॥ सत्यरजतस्थलेऽपि विशिष्टज्ञानस्य सत्त्वात्तदेव कारणं॥ अस्तु वा तत्रापि भेदाग्रहस्यैव कारणमिति।

न चान्यथाख्यातिः संभवति। रजतप्रत्यक्षे कारणस्य रजतसन्निकर्षस्याभावात्॥ रंगे रजतबुद्धेरनुपपत्तिरिति चेन्न॥ सत्यरज
तस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वादन्यत्रापि तत्कल्पनात्॥ न च संवादिप्रवृत्तौ तत्कारणं। विसंवादिप्रवृत्तौ भेदा
ग्रहः कारणमिति वाच्यं॥ लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात्॥ किंच रंगे रजतत्वविशिष्टबुध्यनुरोधेन ज्ञानलक्षणप्रत्या
सत्तिकल्पनेऽपि न क्षतिः॥ फलगौरवस्यादोषत्वात्॥ किंच यत्र रंगरजतयोरिमे रजते इति ज्ञानं जातं तत्र न कारणबाधोऽपि। अपि च यत्र
रंगरजतयोरिमे रजतरंगे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती न स्याताम्॥ रंगे रंगभेदाग्रहे रजते रजतभेदाग्रहे चान्य
थाख्यातिभयात्॥ त्वन्मते रंगे रंगभेदाग्रहस्य रजते रजतभेदाग्रहस्य च सत्त्वात्॥ दोषात् रंगे रजतभेदाग्रहस्य रजते रंगभेदग्र
हस्य च सत्त्वात्॥ किंचानुमितिभ्रान्तौ भेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधूमवद्भेदाग्रहादनुमितिर्निराबाधा॥ यदि चाविशिष्ट
ज्ञानं कारणं तदा भ्रमानुमितौ वह्निव्याप्यधूमज्ञानमनुमित्यनुरोधात्परामृश्यतामिति॥ तत्र यत्नुभवतः पाशार ज्जुं गुरुं चान्यथाख्या
तेर्मत्पक्षमेव प्रमाणं॥ रंगं रजततया जानामीत्यनुभवादिति संक्षेपः॥ पूर्वं व्याप्तिरुक्ता तद्ग्रहोपायस्तु न दर्शितः तत
स्तद्दर्शयति॥ व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा॥ हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छंकानिवर्तकः॥ १२॥ व्यभिचाराग्रहः सह
चारग्रहश्च व्याप्तिग्रहे कारणमित्यर्थः। व्यभिचारग्रहस्य व्याप्तिग्रहप्रतिबंधकत्वात् तदभावः कारणं॥ एवं अन्वयव्यतिरेका

व्याभिचारग्रहस्यापि हेतुता॥ भूयोदर्शनं तु न कारणं॥ व्यभिचारास्फुर्तौ सहचारदर्शनेऽपि क्वचित् व्याप्तिग्रहात्॥ क्वचिद्व्यभिचारशंकाविधूननहृद्भूयोदर्शनमनुपयुज्यते। तत्र भूयोदर्शनेऽपि शंकानापैति तत्र विपक्षबाधकस्तर्कोऽपेक्षितः। तथाहि॥ वह्निरहितेऽपि धूमः

४५ स्यादिति व्यभिचारशंकोद्भवति तदा सा वह्निधूमयोः कार्यकारणभावस्य प्रतिसंधानान्निवर्तते यद्ययं वह्निमान्न स्यात्तदा धूमवान्न स्यात् कारणं विना कार्यानुत्पत्तेः॥ यदि क्वचित्कारणं विनापि भविष्यति तदा अहेतुक एव वा भविष्यतीति॥ तत्राप्याणकानवस्थितिः। तदा सा व्याघातादपसारणीया॥ यदि कारणं विना कार्यं स्यात्तदा धूमार्थं वह्नेस्तृप्त्यर्थं भोजनस्य नियमत उपादानं न तवैव न स्यादिति॥ यत्र स्वतएव शंका नावतरति तत्र तर्कानपेक्षापीति तदिदमुक्तं तर्कः॥ क्वचिच्छंकानिवर्तक इति॥ इदानीमुपाधिं निरूपयति॥ साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा॥ स उपाधिरिति॥ साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकत्वमर्थः॥ श्लोक

ननु सर्वदा मैत्रीतनयत्वादिकं प्रति शाकपाकजत्वं नोपाधिः स्यात्॥ तत्र साध्यव्यापकत्वाभावात् श्यामत्वस्य घटादावपि सत्वाद्यंबाधः सत्यस्तः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्वं नोपाधिः स्यात् प्रत्यक्षस्यात्मादिषु सत्वात्तत्र च रूपाभावात्॥ एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं नोपाधिः स्यात् रि नाशितस्य प्रागभावे सत्वात्तत्र भावत्वाभावादिति चेन्न॥ यद्धर्मावच्छिन्न ४६ साध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थे तात्पर्यात् मित्रातनयत्वावच्छिन्नसाधनस्याव्यापकं च॥ एवं ध्वंसो

तः विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकत्वं भावत्वं। एवं काकः श्यामो मित्रातनयत्वादित्यत्र मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकं शाकपाकजत्वं उपाधिः॥ सद्धेतौ एतादृशधर्मो नास्ति। यद्धर्मावच्छिन्नस्य साध्यव्यापकं तद्धर्मावच्छिन्नस्य [illegible] साधनस्य चाव्यापकं किंचित् स्यात्। व्यभिचारिणि तु पक्षधर्मताधिकरणं च साध्याधिकरणं च उपाधिशून्यसाध्यव्यभिचारनिरूपकमधिकरणं अंतर्भूतस्तदन्यतरत्वावच्छिन्नस्य साध्यव्यापकत्वं साधनस्य चाव्यापकत्वं [illegible] मनुपाधेरसंभवति॥ अतएव तु स्यमप्युपाधिस्वरूपमेतदनुसारेण दर्शयिता॥ सर्वेषामपि सामानाधिकरण्यात् सदुपाधयः॥ हेतोरेकाश्रये येषां स्वये साध्यव्यभिचारिता॥ स उपाधिः स्वं च साध्यं च स्वस्साध्ये तयोर्व्यभिचारित्वमर्थः॥ उपाधेर्दूषकताबीजमाह॥ व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनं॥ स्वव्यभिचारेण साध्यव्यभिचारानुमानमुपाधेः प्रयोजनमित्यर्थः॥ तथाहि॥ यत्र शुद्धसाध्यव्यापकत्वमुपाधिः॥ तत्र शुद्धेनोपाधिव्यभिचारेण साध्यव्यभिचारानुमानं॥ यथा धूमवान्वह्नेरित्यादौ वह्निर्धूमव्यभिचारी तद्व्यापकार्द्रेंधनव्यभिचारित्वादिति व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यकत्वात्॥ यत्र किंचिद्धर्मावच्छिन्नसाध्यस्य व्यापकमुपाधिस्तत्र तद्धर्मवति उपाधिव्यभिचारेण साध्यव्यभिचारानुमानं यथा स श्यामो मित्रातनयत्वादित्यत्र मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयशाकपाकजत्वव्यभिचारित्वादिति॥ बाधानुन्नीतपक्षेतरस्तु साध्यव्यापकताग्राहकप्रमाणाभावात्वे
यो

दित्या

सि॰मु॰व॰शा॰रवं॰ घातकत्वाच्चेनोपाधिः॥ बाधोन्नीतस्तूपाधिर्भवत्येव। यत्र वह्निरनुष्णः कृतकत्वादित्यादौ प्रत्यक्षेण वह्नेरुष्णत्वग्रहे वह्नीतरत्वमुपा-
धिः॥ यस्योपाधेः साध्यव्यापकत्वादिकं संदिग्धं स संदिग्धोपाधिः॥ पक्षेतरस्तु संदिग्धोपाधिरपि नोद्भावनीयः कथकसंप्रदायानु- त्वं २
९६ रोधादिति। केचित्तु॥ सत्प्रतिपक्षोत्थापनमुपाधेः प्रयोजनं॥ तथाहि। अयोगोलकं धूमवद्वह्नेरित्यादौ अयोगोलकं धूमाभावव-
दार्द्रेन्धनाभावादिति सत्प्रतिपक्षसंभवात्॥ इत्थं च साधनव्यापकोपि क्वचिदुपाधिः॥ यथा करका पृथिवी कठिनस्पर्शवत्त्वादि-
त्यादावनुष्णाशीतस्पर्शवत्त्वं। नचात्र स्वरूपासिद्धेरेव दूषणमिति वाच्यं। सर्वत्रोपाधेर्दूषणं। तस्सावश्यकत्वादत्र साधनव्यापकः पक्षा-
वृत्तिरुपाधिरित्याहुः॥ शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते। अनुमानगतार्थत्वादिति वैशेषिकं मतं॥ ९॥ वैशेषिकमते
प्रत्यक्षमनुमानं च प्रमाणं॥ शब्दोपमानयोस्त्वनुमानविधयैव प्रामाण्यं॥ तथाहि। दंडेन गामानय। इतिपदानि वैदिकपदानि वा ता- श्री शिव
त्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि॥ आकांक्षादिमत्पदकदंबकत्वात्॥ घटमानयेतिपदकदंबवत्॥ यद्वा॥ एते ९६
पदार्थाः मिथः संसर्गवंतः योग्यतादिमत्पदोपस्थापितत्वात्॥ तादृशपदार्थवत्॥ दृष्टांतेपि दृष्टांतांतरेण साध्यसिद्धिरिति॥
एवं गवयमत्पक्षानंतरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकं॥ यथा गोपदं गोत्वप्रवृत्तिनिमित्तकं॥ यद्वा॥ गवयपदं सप्र-
वृत्तिनिमित्तकं॥ साधुपदत्वादित्यनुमानेन न पक्षधर्मताबलात् गवयत्वप्रवृत्तिनिमित्तकं भासते॥ तन्मतं दूषयति॥ नन्वसम्य

विना व्याप्तिबोधः शब्दादिबोधवत्॥ व्याप्तिज्ञानं विनापि शाब्दबोधस्यानुभविकत्वात्॥ न हि सर्वत्र शब्दश्रवणानंतरं व्याप्तिज्ञानेमा-
नमस्तीति॥ किंच सर्वत्र यदि शाब्दस्थले व्याप्तिज्ञानं कल्प्यते। तदा सर्वत्रानुमितिस्थलेपदज्ञानं कल्प्यपि शाब्दबोध एव किं न स्वी-
क्रियतेइति॥ द्वैविध्यं तु भवेद्व्याप्तेरन्वयव्यतिरेकतः॥ अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते॥ १॥ त्रैविध्यमनुमानस्य केवला-
न्वयिभेदतः॥ अनुमानं त्रिविधं केवलान्वयि केवलव्यतिरेकि भेदात्॥ तत्रासद्विपक्षः केवलान्वयी। यथा इदं वाच्यं अभिधेयत्वा-
दित्यादौ तत्र हि सर्वस्यैव ज्ञेयत्वाद्विपक्षासत्वं॥ न तु सर्वेषामेव धर्माणां व्यावृत्तत्वात् केवलान्वय्यप्रसिद्धिरिति चेन्न॥ व्यावृत्तत्व-
स्य सर्वसाधारण्येन तस्यैव केवलान्वयित्वात्॥ यद्वा वृत्तेर्न साधारण्यं किंतु व्यावर्तते तर्हि व्यावृत्तत्वं॥ तेनैव व्यावृत्तत्वेन तस्यैव केव-
लान्वयित्वं॥ किं वान्योन्याभाववृत्तिप्रतियोगितानवच्छेदकधर्मत्वं केवलान्वयित्वं॥ यथा गगनाभाववत्कपिसंयोगाभावादौ प्र-
सिद्धं॥ असत्सपक्षः केवलव्यतिरेकी। यथा पृथिवीतरेभ्यो भिद्यते गंधवत्वात्॥ तत्रहि न त्रहि जलादौ चतुर्दशभेदस्य पूर्व-
मसिद्धतया निश्चितसाध्यवतः सपक्षस्याभावइति॥ सत्सपक्षविपक्षोऽन्वयव्यतिरेकी॥ यथा वह्निमान् धूमादित्यादौ तत्र स-
पक्षस्य महानसादेर्विपक्षस्य जलह्रदादेश्च सत्वादिति॥ तत्र व्यतिरेकिणो व्यतिरेकव्याप्तिज्ञानं कारणेन तद्व्यतिरेकव्या-
प्तिं निरूपयति॥ साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत्॥ साध्याभावव्यापकीभूताभावप्रतियोगित्वमस्य॥॥

सि.मु.व.प्र.रामा. अत्रेदं बोध्यं॥ येन संबंधेन येन रूपेण व्यापकता यत्संबंधावच्छिन्नयद्धर्मावच्छिन्नं प्रतियोगिताकत्
द्धर्मावच्छिन्नाभाववत्ता। तेन तत्संबंधावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिः॥ इत्थं च यत्र विशेषणतासंबंधेन
तद्व्यापकत्वं गंधाभावे गत्वेनोक्तं तत्र गंधाभावेनेतरत्वात्यंताभावः सिद्ध्यति। यत्र तु तादात्म्यसंबंधेनेतरव्यापकता गत्वेन तत्र
४७ तादात्म्यसंबंधेनेतरस्याभावसिद्ध्यति स एवान्योन्याभावः॥ नचान्योन्याभावासिद्ध्या पृथिवीतरभेदवतीत्यनुमितिर्न स्यात्॥
विशेषणतानाभावात्। इष्टापत्तेः पृथिव्यामितरभेद इति॥ प्रमानुमितिश्च परमं पृथिवीतरभेदवतीत्यनुमितिः॥ एवं च यत्र सं
योगसंबंधेन घटसंयोगसंबंधावच्छिन्नप्रतियोगिताकघटाभावे न तु इदं संयोगसंबं
धावच्छिन्नप्रतियोगिताकघटाभावः सिद्ध्यति। अत्र च व्यतिरेकव्याप्तिज्ञाने व्यतिरेकसहचारज्ञानं कारणं॥ केचित्तु॥ ॥ श्रीशिव
व्यतिरेकसहचारिणान्वयव्याप्तिरेव गृह्यते॥ न तु व्यतिरेकज्ञानं कारणं॥ यत्र व्यतिरेकसहचारा व्याप्तिग्रहस्तत्र व्यतिरेकीति
व्यते॥ साध्यप्रसिद्धिस्तु घटादावेव जायतापश्चात्पृथिवीत्वावच्छेदेन साध्यसाधनमिति वदंति। अर्थापत्तिस्तु नैव प्रमाणांत ४७
रमेष्यते॥ व्यतिरेकव्याप्तिबुध्या चरितार्था हि सा यतः॥ अर्थापत्तिप्रमाणांतरं केचिन्मन्यंते। तथा हि॥ यत्र देवदत्तस्य शतव
र्षजीवित्वं ज्योतिःशास्त्रादवगतं जीवितो गृहासत्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीवित्वान्यथानुपपत्त्या बहिःसत्वं कल्प्य

ते॥ तदर्थमनुमानेन गतार्थत्वान्नेष्यते। तथा हि। जीवितस्य बहिःसत्वं गृहसत्वान्यतरव्यापकत्वं तत्रान्यतरासिद्धौ गम्यमानायां
गृहसत्वाबाधाद् बहिःसत्वमनुमितौ भासते। पीनो देवदत्तो दिवा न भुंक्ते इत्यादौ पीनत्वस्य भोजनव्याप्यत्वावगमाभोजनासि
द्धिर्दिवाभोजनबाधे रात्रिभोजनं सिध्यतीति॥ इतरबाधसहकाराद्व्यतिरेकीत्युच्यते। अभावप्रत्यक्षस्यानुमानिकत्वादनुपलं
भोऽपि न प्रमाणांतरं किं चानुपलंभस्याज्ञानस्य हेतुत्वे ज्ञानकरणकत्वात्प्रत्यक्षत्वं ज्ञातस्य हेतुत्वे तु तत्रापि ज्ञानुपलंभांत
रापेक्षायामनवस्था॥ एवं चेष्टापि न प्रमाणांतरं तस्याः संकेतग्राहकशब्दस्मारकत्वेन लिप्यादिसमशीलत्वात् पूर्वेण
धीतत्रिर्बाधादिलुव्याप्त्या ग्रहस्तदनुमितिरेवेति॥ सुखं निरूपयति॥ सर्वजगतामेव काम्यं धर्मेण जन्यते॥ का
म्यमभिलाषविषयः॥ धर्मत्वेन सुखत्वेन कार्यकारणभाव इत्यर्थः॥ दुःखं निरूपयति॥ अधर्मजन्यं दुःखं स्या
त्प्रतिकूलं सचेतसां॥ अधर्मत्वेन दुःखत्वेन कार्यकारणभावः प्रतिकूलं सर्वेषां स्वाभाविकद्वेषविषय इत्यर्थः॥ इ
च्छां निरूपयति॥ निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते॥ इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि॥१॥ इच्छा हि फ
लविषयिणी उपायविषयिणी वा॥ फलं सुखं दुःखाभावश्च॥ तत्र फलेच्छां प्रति फलज्ञानं कारणं॥ अत एव फलं पुरुषार्थः संभव
ति॥ यत्ज्ञानं स्वतः प्रवृत्तिर्वृत्तिः तयोरिष्यते॥ इतरेच्छानधीनेच्छाविषयत्वं फलितार्थः॥ उपायेच्छां प्रति इष्टसाधनताज्ञानं कार

सि·मु·व·प्रका· यं॥ चिकीर्षा कृतिसाध्येष्टत्वप्रकारेच्छा तु या भवेत्॥ तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत्॥ १५१॥ कृतिसाध्यत्वप्रकारिकाकृ
तिसाध्यक्रियाविषयिणी इच्छा चिकीर्षा पाकं कृत्या साधयामीति तदनुभावात्॥ चिकीर्षां प्रति कृतिसाध्यताज्ञानं कारणं इ
ष्टसाधनताज्ञानंच॥ अतएव वृष्ट्यादौ कृतिसाध्यताज्ञानाभावान्न चिकीर्षा॥ बलवद्विष्टहेतुत्वमतिः स्यात्प्रतिबंधिका॥
४८ बलवद्द्विष्टसाधनताज्ञानं तत्र प्रतिबंधकं॥ बलवद्द्वेषप्रतिबंधक इत्यन्ये॥ तद्धेतुत्वबुद्धिस्तु हेतुत्वं कस्यचिन्मते॥ बलवदनि
ष्टाजनकत्वज्ञानं कारणमित्यर्थः॥ द्वेषं निरूपयति॥ द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य कारणं॥ बलवद्द्विष्टसाधन
ताज्ञानं कारणं॥ तेन नांतरीयकदुःखजनके पाकादौ न द्वेषः॥ यत्नं निरूपयति॥ प्रवृत्तिश्च निवृत्तिश्च तथा जीव
नकारणं॥ एवं प्रयत्नत्रैविध्यं तांत्रिकैः परिकीर्तितं॥ प्रवृत्तिर्निवृत्तिर्जीवनयोनियत्नभेदात् यत्नस्त्रिविध इत्यर्थः॥ चिकी श्रीशिव
र्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा॥ उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत्॥ १५२॥ निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधन ४८
ताधियः॥ मधुविषसंपृक्तान्नभोजनादौ बलवदनिष्टानुबंधित्वेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः॥ कृतिसाध्यता
ज्ञानादिव द्वेषबलवदनिष्टाननुबंधित्वज्ञानमपि तत्रान्वयव्यतिरेकाभ्यां प्रवृत्तौ कारणमित्यपि वदंति॥ कार्यताज्ञानमेव
प्रवर्तकमिति गुरवः॥ तथाहि॥ ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति॥ सा च कृतिसाध्यताज्ञा

नसाध्या॥ इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात्॥ चिकीर्षा हि कृतिसाध्यत्वप्रकारिकेच्छा तत्र साध्यत्वं प्रकारस्तत्प्रकारकं
ज्ञानं चिकीर्षायां तद्द्वारा प्रवृत्तौ च हेतुः॥ न त्विष्टसाधनताज्ञानं तत्र हेतुः कृत्यसाध्येऽपि प्रवृत्त्यापत्तेः॥ कृत्यसाध्यताज्ञानं प्रतिबंधकमि
ति चेन्न॥ तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात्॥ न च द्वयोरेव हेतुत्वं गौरवात्॥ ननु तन्मतेऽपि मधुविषसंपृक्तान्नभक्षणे चे
ष्यवहने च प्रवृत्त्यापत्तिः॥ कार्यताज्ञानस्य प्रवर्तकत्वादिति चेन्न॥ स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानस्य प्रवर्तकत्वात्॥
काम्ये हि यागपाकादौ कामनापि विशेषणं॥ तत्र च बलवदनिष्टाननुबंधिकाम्यसाधनताज्ञानेन कार्यताज्ञानं ततः प्रवृत्तिः॥
तत्र च भोजनेन न प्रवर्तते॥ तदानीं कामनायाः पुरुषविशेषणत्वाभावात्॥ नित्ये च शौचादिकं पुरुषविशेषणं॥ तेन शौचादिज्ञानाधी
नकृतिसाध्यताज्ञानात् प्रवृत्तिः॥ ननु तदपेक्ष्यत्वात् पर्वेन बलवदनिष्टाननुबंधीष्टसाधनताविषयकं कार्यताज्ञानमेवहे
तुरस्तु॥ बलवदनिष्टाननुबंधित्वं च स्वोत्पत्तिनांतरीयकदुःखाधिकदुःखाजनकत्वं॥ बलवद्द्वेषविषयदुःखाजनकत्वं वे
ति चेन्न॥ इष्टसाधनत्वकृतिसाध्यत्वयोर्युगपदनुभवाशक्यत्वात्॥ साध्यत्वसाधनत्वयोर्विरोधात्॥ असिद्धस्य हि साध्यत्वं
सिद्धस्य साधनत्वं॥ न चैकमेकदा सिद्धमसिद्धं चेति ज्ञायते॥ तस्मात् कालभेदादुभयं ज्ञायत इति॥ मैवं॥ कालभेदेन बलवदनिष्टा
ननुबंधीष्टसाधनत्वे सति कृतिसाध्यताज्ञानस्य हेतुत्वात्॥ न च साध्यत्वसाधनत्वयोर्विरोधः॥ यदा कदाचित् साध्यत्वसाधनत्व
योरविरोधात् एकदा साध्यत्वसाधनत्वयोर्ज्ञातत्वात्॥ नवीनास्तु॥ ममेदं कृतिसाध्यमिति ज्ञानं न प्रवर्त्तकं अनागतत्वेन तस्य ज्ञातुमशक्य

सि·मु·टी·प्र·शब्दखं० तात्पर्यकं तु यादृशस्य पुंसः कृतिसाध्यत्वेनेष्टं तादृशत्वेन स्वस्य प्रतिसंधाय तत्र प्रवर्तते॥ तेनौदनकामस्य तत्साधनतातत्तदुपकरणा
वतः पाकः कृतिसाध्यस्तादृशश्चाहमिति अभिसंधाय पाके प्रवर्तनं तस्यात्॥ तन्न। स्वकल्पितत्वप्यादिप्रवृत्तौ योधनेकामो
दादिनासंभोगादेस्तदभावात्॥ इदं तु बोध्यं॥ तदानीमिष्टसाधनतादिज्ञानं प्रवर्तकं॥ तेन भाविविषयावगत्यैव तत्स्य न प्रवृत्तिः नन्
५० नीं कृतिसाधनताज्ञानाभावात्तु एवं च लोभोजनेन प्रवर्तते। तदानीमिष्टसाधनत्वाज्ञानात्॥ प्रवर्तते चरापदूषितचित्तो विषादिभक्षणे
तदानीं बलवदनिष्टाननुबंधित्वाज्ञानात्॥ न चास्तिकस्यागम्यागमनतृष्णा क्षुधादिप्रवृत्तौ कथं बलवदनिष्टाननुबंधित्वबुद्धिर्न र
२ कसाधनत्वज्ञानमिति वाच्यं। उत्कटरागादिना नरकसाधनताधीतिरोधानात्। द्वेष्यादिकृतिसाध्यताज्ञानाभावात्तु न चिकीर्षा
प्रवृत्तिः। किंतु इष्टसाधनताज्ञानादिच्छामात्रं। कृतिश्च प्रयत्नरूपा बोध्या॥ तेन जीवनयोनियत्नसाध्यत्वज्ञानापेक्षा संसारानुपप
त्तिः इत्थं च प्रवर्तकत्वानुरोधात् विधेरपि इष्टसाधनता वाच्यार्थः। इत्थं च विश्वजिता यजेतेत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फ श्रीशिव
लं कल्प्यते। नन्वहरहः संध्यामुपासीतेत्यादौ इष्टानुत्पत्तेः प्रवृत्तिः कथं न चार्थवादिकं ब्रह्मलोकाद्यवाप्तिः प्रत्यवायाद्यभावो ५०
वा फलमिति वाच्यं। तथा सति काम्यत्वे नित्यत्वहान्यापत्तेः। कामनाभावेऽकरणापत्तेः इत्थं च फलश्रुतिस्तत्रार्थवाद इति च
न्वा। ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्वयोरिव भरणीश्राद्धादौ काम्यत्वनैमित्तिकत्वयोरिव नित्यत्वकाम्यत्वयोरप्यविरोधात्। न
च कारणाभावेऽकरणापत्तिः स्विष्टकालस्तवपाठे विवकामनासद्भावस्यैव कल्पनात्। ननु यद्यदाधिककार्यताज्ञानात् प्रवृत्ति
न संभवति। स्वेष्टसाधनत्वमपि तादृशकार्यताज्ञानसहस्रेणापि प्रवृत्तेरसंभवात्॥ यद्यपि पञ्चपर्वफलमिति तदपि न कामना

भावादकरणापत्तेस्तौल्यात्॥ कामनाकल्पने तार्थवादिकफलमेव रात्रिसत्रन्यायेन कल्प्यतां॥ अन्यथा प्रवृत्त्यनुपपत्तेः। तेनानुत्पत्तिं
तथा चान्ये प्रत्यवायस्यानभ्यसे॥ एवं संध्यामुपासते ये तु सततं संशितव्रताः॥ विधूतपापास्ते यान्ति ब्रह्मलोकमनामयमिति॥ ए
वंद्यादरस्य श्राद्धे पितृस्वर्गप्रीतिमावहत्वादित्यादिकर्तृनिष्ठस्वर्गादिकमेव फलमस्तु॥ न च पितृप्रीतिः कथं फलं व्यधिकरणे
त्वादिति वाच्यं। गया श्राद्धादौ विवाहादेश्च स्वसंबंधेनैव फलजनकत्वस्येव क्वचित्कल्पनात्॥ अन्यथा तु। शास्त्रदर्शितफलमनु
पुत्रजननादिस्वर्गादि॥ पितृणामुक्तत्वे तु स्वस्य स्वर्गादिफलं। यो यन्नित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गफलकत्वात्॥
पदापरीक्षितप्रवृत्तिश्चिन्नसंभवति। न हि तत्र स्वदुःखाभावो वा स्वतः पुरुषार्थः। न वा तत्साधनं॥ प्रत्यवायानुत्पत्तौ कथं प्र
वृत्तिरिति चेन्न। इत्थं तथाहि। नित्ये कृतेऽपि प्रत्यवायाभावो वास्तिकृतिनिवृत्तद्भावेन तदभावः। एवं प्रत्यवायाभावसत्त्वे दुःखप्रागभा
वसत्त्वं तदभावे तदभावइति योगक्षेमसाधारणकारणतायाः दुःखप्रागभावप्रत्यपि स्फुटत्वात्॥ एवं चैतन्नित्यकर्मणस्त्यस्यापि
दुःखप्रागभावहेतुत्वमिति॥ ननु नरकनाशस्य यदि तत्र विध्यर्थे कथं न प्रवृत्तिः इष्टसाधनत्वाभावस्य बोधयितुमशक्यत्वा
दिति चेन्न॥ तत्र बाधितेष्टसाधनत्वे कृतिसाध्यत्वं च न विध्यर्थः॥ किंतु बलवदनिष्टाननुबंधित्वमात्रं॥ तदभावश्च
नरकाद्यभावे बलवदनिष्टाननुबंधीष्टसाधनत्वे कृतिसाध्यत्वं विध्यर्थः॥ तदभावश्च नरकाद्यभावे ध्यमानो विशिष्ट

भावो विशेष्यवति विशेषणाभावे विश्राम्यति। ननु श्येनेनाभिचरन्यजेतेत्यत्र कथं बलवदनिष्टाननुबन्धित्वमित्यत आह श्येन
स्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात्। न चैवं धत्वान्न निषेध इति वाच्यं। अभिचारप्रायश्चित्तोपदेशात्। न
च मरणानुकूलव्यापारमात्रं यदि हिंसा तदा खड्गकारस्य कूपकर्तुश्च हिंसकत्वापत्तिः। गलं ... न नस्सण जन्यमरणत्वा
वच्छिन्नापत्तिश्चेति वाच्यं। मरणोद्देश्यकत्वस्यापि विशेषणत्वात्। अन्योद्देश्यकस्य वह्निप्रक्षिप्तनगरे वह्नत्रान्मरणस्य तु ... अनिक
प्रायश्चित्तमिति चेन्न। श्येनवारणाय दृष्टद्वारकत्वेन विशेषणात्। अत एव मरणार्थं स्थलशिवपूजादेरपि न हिंसात्वं।
न च साक्षान्मरणजनकस्यैव हिंसात्वं। श्येनस्य तु न तथा। किं तु तज्जन्यापूर्वस्येति वाच्यं। खड्गघातेन व्रणपाकपरम्परया मरणे
हिंसात्वानापत्तेः॥ केचित्तु श्येनस्य हिंसाफलं। न तु मरणं। तेन श्येनजन्यखड्गघातादिरूपा हिंसा अभिचारपदार्थः। तस्य च
पापजनकत्वात्। अतः श्येनस्य वैधत्वात्पापाजनकत्वेपि अग्रिमपापफलसमवायसंतोनं प्रवर्त्तते। आचार्यास्तु। आप्त श्रीशिव
मिप्रायेणेति ध्येयं। यागं कुर्यादित्यादौ आख्यातेत्यनेन ... मात्रस्येच्छावाचित्वं। ... एवं च स्वर्गकामो य ५०
जतेत्यादौ यागः स्वर्गकामकृतिसाध्य इत्यर्थः। तत्र ... साधनताविषयकमनुमानं प्रवर्त्तते। कल्ब
जभक्षणादौ तदभावान्न प्रवर्त्तते। यत्तु वेदापौरुषेयत्वेन ... प्रतिविधिरेवेत्यादौ ... लिङ्गादौ प्रयोगमानेन
वक्तृस्मरणं बाधकं। कपिलकणादादिकमारभ्याध्ययनपर्यन्तं कर्त्तुः स्मरणात्। स्वेच्छया प्रदीप्यमानत्वात्। अन्यथा स्मृतीनामपि

अकर्तृकत्वापत्तेः। तत्रैव कर्त्तुः स्मरणं अस्तीति चेत् वेदेपि छन्दांसि जज्ञिरे तस्मादिति कर्तृस्मरणमस्त्येव। एवं प्रतिमन्वन्तरं चैषा श्रु
तिरन्याभिधीयते। इत्यपि द्रष्टव्यं। स्वयं भूरेष भगवान्वेदो गीतस्त्वया पुरा॥ शिवाद्या ऋषिपर्यन्ताः स्मर्त्तारोस्य न कारकाः इति तु वेद
स्य स्मर्तृकालिमात्रं। न च पौरुषेयत्वे भ्रमादिसंभवादप्रामाण्यस्यादिति वाच्यं। नित्यसर्वज्ञत्वेन निर्दोषत्वात्। अत एव पुरुषान्तरस्य भ्रमा
दिसंभवान्न कपिलादिकर्तृत्वं वेदस्य। किं च वर्णानामेव अनित्यत्वस्य वक्ष्यमाणत्वात् तत्तदानुपूर्वीसंदर्भस्य वेदस्यानित्यत्वमिति। उपा
दानस्य चाध्यक्षमत्र तो जनकं भवेत्। उपादानस्य समवायी कारणस्याध्यक्षं प्रत्यक्षं प्रत्यक्षं तत्कारणमिति तन्निवर्त्तितानिति। दिक्। साध
नताज्ञानस्य निवृत्तिप्रवृत्तिजनकत्वमन्वयव्यतिरेकाभ्यामवधारितमिति भावः॥ यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत्॥
जीवनयोनियत्नो यावज्जीवमनुवर्त्तते। स चातीन्द्रियः। तत्र प्रमाणमाह॥ शरीरे प्राणसंचारे कारणं तत्प्रकीर्त्तितं॥ प्राणसंचा
रोहि अधिकश्वासादिः प्रयत्नसाध्यः। इत्थं च प्राणसंचारस्य सर्वस्य यत्नसाध्यत्वानुमानात्तादृशयत्नसिद्धिः ... अतीन्द्रियत्व
सिद्धिः। सत्वयोनियत्नः॥ गुरुत्वं निरूपयति॥ अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत्॥ अनित्ये तदनित्यं स्यान्नि
त्ये नित्यमुदाहृतं॥ तदेवासमवायि स्यात्पतनाख्ये तु कर्मणि॥ अनित्ये द्व्यणुकादौ तद्गुरुत्वमनित्यं॥ गुरुत्वमनुवर्त्तते। गुरुत्वम
समवायी॥ असमवायीकारणं॥ पतने॥ आद्यपतनेत्यर्थः॥ द्रवत्वं निरूपयति॥ सा सिद्धिर्द्रवत्वस्य ... मिति

सि·मुक्·प्र·टी· कन्धापरं॥ सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः॥१॥ परमाणौ जले नित्यमन्यत्रानित्यमुच्यते॥ द्रवत्वं द्विविधं सांसिद्धिकं नैमित्ति
५२ कं चेति॥ द्वितीयं नैमित्तिकं॥ जलपरमाणौ द्रवत्वं नित्यं॥ अन्यत्र पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्वमनित्यं॥ कुत्रचि
त्तेजसि कुत्रचित्पृथिव्यां नैमित्तिकं तत्र कोवा नैमित्तिकार्थ इति दर्शयति॥ नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु॥ द्र
वत्वं स्यन्दने हेतुः निमित्तं संग्रहे तु तत्॥१॥ अग्निसंयोगजन्यं नैमित्तिकद्रवत्वं॥ तच्च स्वर्णादिरूपे तेजसि घृतजतुप्रभृ
तिपृथिव्यां च वर्त्तते। हेतुः असमवायीकारणमित्यर्थः॥ संग्रहे॥ सक्त्वादिसंयोगविशेषे तद्द्रवत्वं स्नेहसहितं निमित्तमिति बो
ध्यं॥ तेन द्रुतलवणादिना न संग्रहः॥ स्नेहं निरूपयति। स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ॥ जले। जल एवेत्यर्थः॥ स्ने
हः॥ ननु पृथिव्यामपि तैलस्नेह उपलभ्यते॥ न चासौ जलीयः तस्य तथा सति दहनप्रातिकूल्यप्रसंगादत आह॥ तैलान्तरे तत् श्रीशिव
प्रकर्षाद्दहनस्यानुकूलता॥ तत्प्रकर्षात्तत्स्नेहप्रकर्षात्॥ तैले उपलभ्यमानः स्नेहोऽपि जलीय एव तस्य प्रकृष्टत्वाद्दहना ५१
नुकूल्यं॥ अपकृष्टस्नेहं हि जलं वह्निं विना नाशयतीति भावः॥ संस्कारं निरूपयति॥ संस्कारभेदो वेगोऽथ स्थिति
स्थापकभावने॥ मूर्तमात्रे तु वेगः स्यात् कर्मजो वेगजः क्वचित्॥१॥ स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि॥ अती

न्द्रियः स विज्ञेयः क्वचित्स्पन्देऽपि कारणं॥ वेगस्थितिस्थापकभावनाभेदात् संस्कारस्त्रिविध इत्यर्थः॥ वेगो द्विविधः कर्मजो वेगज
श्चेत्यर्थः॥ शरीरादौ हस्तादिनोदनजनितेन पूर्वकर्मणा वेगो जायते॥ तेन च पूर्वकर्मणो नाशे सत्युत्तरं कर्म॥ एवमग्रेऽपि॥ विना च वेगं कर्मणः
प्रतिबंधकत्वात्॥ पूर्वकर्मनाशे उत्तरकर्मोत्पत्तिनिश्चयो न स्यात्॥ यत्र च वेगवता कपालेन जनिते घटे वेगो जन्यते स वेगजो वेगः॥
स्थितिः स्थापक इति॥ आकृष्टशाखादीनां परित्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात्॥ केचिदिति॥ चतुर्षु क्षित्यादिषु
स्थितिस्थापकं केचिन्मन्यन्ते तत्र प्रमाणं नेति भावः॥ स्पन्दे स्थितिस्थापकः क्वचिदाकृष्टशाखादौ॥ भावनाख्यस्तु संस्कारो जीववृ
त्तिरतीन्द्रियः॥ उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत्॥१॥ तस्य संस्कारस्य॥ उपेक्षात्मकज्ञानात्संस्कारानुत्पत्तेरुपेक्षानात्मके
त्युक्तं॥ तत्संशयात्संस्कारानुत्पत्तेर्निश्चय इत्युक्तं॥ तेनोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः॥ ननु स्मरणं प्रत्युपेक्षा
न्यनिश्चयत्वेन हेतुत्वेनोपेक्षादिस्थलेन स्मरणं॥ इष्टं च संस्कारं प्रति ज्ञानत्वेन हेतुतास्त्विति चेन्न। विनिगमनाविरहेणापि
संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात्॥ तत्र प्रमाणं दर्शयति॥ अतः संस्कारं कल्प्यते विना व्या
पारं पूर्वानुभवस्य स्मरणादिजननासामर्थ्यात्॥ स्वस्य व्यापारान्यतराभावेन कारणत्वासंभवात्॥ न च प्रत्यभि

सि॰मु॰ प्रकर॰ श॥॰ शामाति न तु संस्कारस्य हेतुत्वे प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यं॥ अप्रयोजकत्वात्॥ परे तु॥ अनुद्बुद्धसंस्का
रात्प्रत्यभिज्ञा॥ उद्बुद्धादुद्बुद्धसंस्कारस्य हेतुत्वापेक्षया॥ तत्स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यं लाघवादित्याहुः॥ अदृष्टं निरूपयति॥
धर्माधर्मावदृष्टं स्यात् धर्मः स्वर्गादिसाधनं॥ स्वर्गादिसकलसुखानां स्वर्गसाधनीभूतशरीरादीनां च साधनं धर्म इत्यर्थः
६२ तत्र प्रमाणं दर्शयितुमाह॥ गंगास्नानयागादिव्यापारः स तु कीर्तितः॥ यागादिव्यापारतया धर्मः कल्प्यते॥ अ
न्यथा यागादेश्चिरविनष्टतया निर्व्यापारतया च कालान्तरभाविस्वर्गजनकत्वं न स्यात्॥ तदुक्तमाचार्यैः॥ चिरध्वं
स्तं फलायालं न कर्मातिशयं विना॥ ननु यागध्वंस एव व्यापारः स्यात्॥ न च प्रतियोगिध्वंसयोरेकत्राजनकत्वं॥ सर्व श्रीशिव
त्र तथात्वे मानाभावादित्यत आह॥ गंगास्नानादीति॥ गंगास्नानस्य हि स्वर्गजनकत्वे अनन्तानां जलसंयोगध्वंसा
नां व्यापारत्वमपेक्ष्यैकमेवापूर्वं कल्प्यते॥ लाघवादिति भावः॥ ननु ध्वंसोपि न व्यापारः॥ न च निर्व्यापारस्य चि ६२
रध्वस्तस्य कथं कारणत्वमिति वाच्यं॥ अनन्यथासिद्धनियतपूर्ववर्तित्वस्य तत्रापि सत्त्वात्॥ अव्यवहितपूर्ववर्ति
त्वं हि वस्तु संयोगादेः कारणत्वं न तु सर्वत्र कार्यकालवृत्तित्वमिव समवायिकारणत्व इत्यत आह॥ कर्मनाशाज

लस्पर्शादिनाशस्तु सौमनः॥ यदि हि अपूर्वं न स्यात् तदा कर्मनाशाजलस्पर्शादिना नाश्यत्वं धर्मस्य न स्यात् न हि तेन यागादिनाशः
प्रतिबंधो वा कर्तुं शक्यते॥ तस्य पूर्वमेव वृत्तत्वादिति॥ एतेन देवताप्रीतिरेव फलमित्यपास्तं॥ गंगास्नानादौ सर्वत्र देवताप्रीते
रसंभवात् देवताया अचेतनत्वेन तत्प्रीतेरनुद्देश्यत्वात्॥ तत्प्रीतेरवश्यस्वरूपत्वे विष्णुप्रीत्यादौ तदसंभवात्॥ जन्यसुखादेस्त
त्राभावात्॥ अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः॥ नरकादिसकलदुःखानां नारकीयशरीरादीनां च साधनमधर्म इत्यर्थः॥
प्रमाणमाह॥ प्रायश्चित्तादिनाश्योसौ॥ यदि हि अधर्मो न स्यात्तदा प्रायश्चित्तादिना नाश्यो न स्यात्॥ न हि तेन ब्रह्महननादेर्ना
शः प्रतिबंधो वा विधातुं शक्यते॥ तस्य पूर्वं विनष्टत्वादिति भावः॥ जीववृत्तिस्त्वमावुभौ॥ ईश्वरस्य धर्माधर्मौ न भवत इति
भावः॥ इमौ धर्माधर्मौ॥ इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः॥ अतो ज्ञानिना कृतेपि सुकृते दुष्कृते च कर्मणि न फ
लप्राप्तिरिति भावः॥ ज्ञानादपीत्यपिना भोगसंग्रहः॥ ननु तत्त्वज्ञानस्य कथं धर्माधर्मनाशकत्वं॥ नाभुक्तं क्षीयते
कर्म कल्पकोटिशतैरपि॥ इति वचनविरोधात् इदं च वचनं तत्त्वज्ञानिनां प्रातिति वाच्यमहेन सकलकर्मणां भोगनाश
यदिति चेन्न॥ तत्र भोगस्यैव द्वाधितनाशोपलक्षकत्वात्॥ कथमन्यथा प्रायश्चित्तादीनां कर्मणां नाशः॥ तदुक्तं॥
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेर्जुनेति तथा॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥ ननु तत्त्वज्ञानिनः

सि॰मु॰ व॰ प्र॰ ११।० सति हि शरीरावच्छेदेन सुखदुःखादिकं न स्यात्॥ ज्ञानेन सर्वेषां कर्मणां नाशादिति चेन्न॥ प्रारब्धेतरकर्मणामेव नाशादिति। तत्त्व
रीरभोगजनकं हि यत्कर्म तत्प्रारब्धं। तदपि प्रायश्चित्तमेव नाभुक्तमित्यादि न च नमिति। शब्दं निरूपयति॥ शब्दो ध्वनिश्च वर्ण
श्च मृदंगादिभवो ध्वनिः॥ कंठसंयोगादिजन्या वर्णास्ते कादयो मताः॥ सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते॥
५३ दूरस्थशब्दस्याग्रहणादाह॥ श्रोत्रोत्पन्नस्तु गृह्यते। ननु मृदंगाद्यवच्छेदेनोत्पन्नो शब्दः श्रोत्रे कथं तदुत्पत्तिरित आह॥
वीचीतरंगन्यायेन तदुत्पत्तिस्तु कीर्तिता॥ आद्यशब्दस्य बहिर्देशादिगवच्छिन्नोऽन्यः शब्दस्तेन शब्देन जन्यते॥ स चाद्य
शब्दव्यापकः॥ एवं क्रमेण श्रोत्रोत्पन्न उपलभ्यत इति॥ कदंबगोलकन्यायादुत्पत्तिः कस्यचिन्मते॥ आद्यशब्दाद्दशदिक्षु श्रीशिव
शब्दा उत्पद्यंते॥ तैश्चान्ये दशशब्दा उत्पाद्यंते इति भावः॥ अस्मिन् कल्पे गौरवादुक्तं कस्यचिन्मतमिति॥ ननु शब्द ५३
स्यानित्यत्वादुत्पत्तिः कथं संगच्छत इत्यत आह॥ उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता॥ शब्दानामुत्पत्तिविनाश
शालित्वादनित्यत्वमित्यर्थः॥ ननु स एवायं ककार इत्यादिप्रत्यभिज्ञानाच्छब्दानां नित्यत्वं। इत्थं चोत्पादविनाशबुद्धिः
भ्रमरूपैवेत्यत आह॥ सोयं ककार इति बुद्धिस्तु साजात्यमवलंबते॥ तत्र प्रत्यभिज्ञानस्य हि तत्सजातीयत्वं विषयो न तु
तद्व्यक्त्यभेदो विषयः। उत्पन्नप्रतीतिविरोधात्॥ इत्थं च द्वयोरपि बुद्ध्योर्न भ्रमत्वमिति॥ ननु सजातीये सोयमिति प्रत्यभि

ज्ञा कुत्र दृष्टेत्यत आह॥ तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात्॥ यदौषधमन्येन कृतं तदेवौषधं मयापि कृत
मित्यादिदर्शनादिति भावः॥ ॥इति श्रीमहामहोपाध्यायसिद्धांतपंचाननभट्टाचार्यकृता सिद्धां
तमुक्तावली समाप्ता॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ छ॥
शके १६७५ श्रीमुरवीअद्रे लिखिता॥ ॥निर्विघ्नमस्तु॥ ॥श्रीमाधवकुलदेवतार्पणमस्तु॥ शुभम्॥